This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2941

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)
देवीपुराण	लक्ष्मण रामजी	काव्य	पूर्ण	-	9/12	48	संस्कृत	कागद	13	51	-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धामनकरकुलोत्पन्नस्य नारायणशर्मतनुजनुषः

लक्ष्मणशर्मणः पुस्तकमिदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ श्रीदुर्गादेव्यैनमः ॥ बंधूकबंधूभवदाननायाभासैवदासीकृतशोणसिंधोः ॥ सानंदवृंदारकवंदितांघ्रेर्भासःशिवायावयमेवदासाः ॥ १ ॥
तिष्येशिष्यैश्चतुर्भिर्योमुष्यलोकस्यशांतये ॥ अवाततारतारात्मातंवंदेशंकरंगुरुम् ॥ २ ॥ श्रीलक्ष्मींमातरंरंगनाथाख्यंपितरंगुरुम् ॥ काशीनाथश्रीधराख्यौ
गुरून्नत्वायथामति ॥ ३ ॥ शैवोपनामकेनैवनीलकंठेनकेनचित् ॥ सप्तशत्यंगषट्कस्यव्याख्यानंतन्यतेमुदा ॥ ४ ॥ तत्रतावद्भगवत्युपासनायांकेचिद्भ्रांतावदं
ति ॥ मायारूपायाभगवत्याउपासनाशास्त्रेषूक्तातथामायायामिथ्यात्वान्मुक्तौतस्याअनन्वयाच्चाश्रद्धेयेयमुपासनेति ॥ ननुनेयंभ्रांतिः तापनीयेमायावाएषाना
रसिंही सर्वमिदंसृजतिसर्वमिदंरक्षतिसर्वमिदंसंहरतितस्मान्मायामेतांशक्तिंविद्याद्यएतांमायाशक्तिंवेदसमृत्युंजयतिसपाप्मानंतरतिसोमृतत्वंचगच्छतिमहतींश्रि
यमश्नुतइतिश्रुतौमायाशक्तिंवेदोपास्तेसमृत्युंजयतीतिकथनेन ॥ तथात्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया ॥ संमोहितंदेविसमस्तमेतदित्या
दिस्मृतिभिःविष्णोःशक्तेर्जडायामायायाएवोपास्यत्वकीर्तनादितिचेन्न ॥ देव्यथर्वशिरसिसर्वेवैदेवादेवीमुपतस्थुः कासित्वंमहादेवि साब्रवीदहंब्रह्मरूपिणीमत्तः
प्रकृतिपुरुषात्मकंजगदिति तथाभुवनेश्वर्युपनिषदि अथातोंबोपनिषदंव्याख्यास्यामोथह्येनांब्रह्मरंध्रेब्रह्मस्वरूपिणीमामोतीतितथाभुवनाधीश्वरीतुर्यातीताविश्व
विमोहिनीतितथाभावनोपनिषदिस्वात्मैवललितेतिश्रुतिभिः तथात्रिपुरातापनीयसुंदरीतापनीयादिषुपरोरजसेसावदोमितिगायत्रीचतुर्थचरणप्रतिपाद्यब्रह्मवाच
कत्वेनह्रींकारबीजस्यकथनेह्रींकारमन्त्रस्यब्रह्मदेवतात्वप्रतिपादकश्रुत्याच तथाकालीतारोपनिषदादिश्रुतिभिस्तथास्मृतिभिश्चब्रह्मरूपिण्याभगवत्याएवोपास
नाकथनात् ॥ तथाहिस्मृतयः ॥ सूतसंहितायांपंचमाध्याये ॥ अतःसंसारनाशायसाक्षिणीमात्मरूपिणीम् ॥ आराधयेत्परांशक्तिंप्रपंचोल्लासवर्जिताम्मिति ॥
स्कांदेवेदारण्येश्वरमाहात्म्ये ॥ परातुसच्चिदानंदरूपिणीजगदंबिका ॥ सैवाधिष्ठानरूपास्याज्जगद्भ्रांतेश्चिदात्मनीति ॥ कूर्मपुराणेद्वादशाध्याये ॥ एतत्प्रदर्शि
तंविप्रादेव्यामाहात्म्यमुत्तमम् ॥ सर्ववेदांतवेदेषुनिश्चितंब्रह्मवादिभिः ॥ एकंसर्वगतंसूक्ष्मंकूटस्थमचलंध्रुवम् ॥ योगिनस्तत्प्रपश्यंतिमहादेव्याःपरंपदमिति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परात्परतरंतत्त्वंशाश्वतंशिवमच्युतम् ॥ अनंतंप्रकृतौलीनंदेव्यास्तत्परमंपदमिति ॥ शुद्धंनिरंजनंशुभ्रंनिर्गुणंदैन्यवर्जितम् ॥ आत्मोपलब्धिविषयंदेव्यास्तत्परमंपदमिति ॥ तथाहालास्येश्वरमाहात्म्येमायाबीजार्थप्रस्तावे सत्स्वरूपःसदाकारोहकारोधर्मतत्परः ॥ चिदाकारः शिवाकारोरेफः सर्वार्थसिद्धिदः ॥ आनंदरूपयोरैक्यादीकारः सर्वकामदः ॥ बिंदुनादौतदंतस्थौभवेतांमोक्षदावुभौ ॥ सच्चिदानंदरूपंतुप्रोक्तंबीजंमनीषिभिः ॥ सच्चिदानन्दरूपंयत्पदंब्रह्मतदेवहीति ॥ देवीभागवते निर्गुणासगुणाचेतिद्विधाप्रोक्तामनीषिभिः ॥ सगुणारागिभिःसेव्यानिर्गुणातुविरागिभिरिति ॥ ब्रह्मांडपुराणेललितोपाख्याने ॥ चितिस्तत्पदलक्ष्यार्थाचिदेकरसरूपिणीत्यादयोष्टादशपुराणेषूपपुराणेषुचस्मृतयोद्रष्टव्याः ॥ ननुतर्हिषोडशीग्रहणाग्रहणयोःक्रियाविषयत्वात्तत्रशाखाभेदेनविकल्पसंभवेपिवस्तुस्वरूपस्यैकविधत्वात्तत्रविकल्पासंभवेनभगवतीस्वरूपस्यमायास्वरूपत्वप्रतिपादकस्तुत्यासहभगवत्याब्रह्मरूपत्वप्रतिपादकश्रुतेर्विरोधइतिचेन्न ॥ मायायावेदांतेषुमिथ्यात्वान्मिथ्यापदार्थस्याधिष्ठानेकल्पितत्वात्तस्याधिष्ठानसत्तातिरिक्तसत्ताभावान्मायायामधिष्ठानसत्ताप्रवेशान्मायास्वरूपोपासनायामपिसत्तारूपब्रह्मणएवोपासनासंभवतीत्याशयेनमायास्वरूपत्वप्रतिपादनेपिविरोधाभावात् ॥ यथाब्रह्मणउपासनायामपिनकेवलंब्रह्मणोग्रहणं किंतुशक्तिविशिष्टस्यैवशक्तेस्तदतिरेकेणाभावात् ॥ केवलस्योपासनासंभवाच्च ॥ तथामायोपासनायामपिनकेवलंमायायाअवस्थानमस्ति ॥ येनकेवलायाउपासनंसंभवेत् ॥ किंतुब्रह्माधिष्ठानयुतायाएवावस्थानमितिभगवत्यामायारूपत्वप्रतिपादनेपिफलतोब्रह्मस्वरूपमेवभगवत्यासिध्यतीतिश्रुत्योःपरस्परंविरोधाभावात् ॥ तदुक्तम् ॥ पावकस्योष्णतेवेयमुष्णांशोरिवदीधितिः ॥ चंद्रस्यचंद्रिकेवेयंशिवस्यसहजाध्रुवेति ॥ तथा ॥ स्वपदास्वशिरश्छायांयद्वल्लंघितुमीहते ॥ पादोद्देशेशिरोनस्यात्तथेयंबैंदवीकलेति ॥ तथाचयथाग्नौहोमेग्निशक्तौहोमोर्थसिद्धएवमग्निशक्तौहोमेप्यग्नौहोमोर्थसिद्धस्तद्वन्मायायाभगवतीत्वेपिब्रह्मणएवभगवतीत्वंसिद्धमितितस्यैवोपासनायांग्रहणंमायायामिथ्यात्वप्रतिपादकवाक्येषुतुब्रह्मणोमिथ्यात्वाभावात्केवलमायायाएवग्रहणं तस्यामिथ्यात्वेतदधिष्ठानस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यत्वादुपासकस्योपास्यमायापदार्थांतर्गतब्रह्मांशस्यमोक्षदशायामनुस्यूतत्वान्नमुक्तावुपास्यस्वरूपत्यागः ॥ अतएवांतर्यामिब्राह्मणे पृथिव्यादिमायांता
नां पदार्थानां यःपृथिव्यांतिष्ठन्यंपृथिवीनवेद यस्यपृथिवीशरीरं यःपृथिवीमंतरोयमयतीत्यादिनांतर्यामिचेतनसंबंधेनैवदेवतात्वमुपव. र्णितं तथाचसर्वंखल्विदं
ब्रह्मेतिश्रुतिरपिअनुगृहीताभवतितत्तदेतत्सर्वमभिप्रेत्यसूतसंहितायामुक्तम् ॥ चिन्मात्राश्रयमायायाःशक्त्याकारेद्विजोतमाः॥ अनुप्रविष्टायासंविन्निर्विकल्पास्व
यंप्रभा ॥ सदाकारासदानंदासंसारोच्छेदकारिणी ॥ साशिवापरमादेवी शिवाभिन्नाशिवंकरीति ॥ यद्वा भगवतीस्वरूपप्रतिपादकवाक्येषुयेमायाशक्तिक
ल दिशब्दास्ते लक्षणयामायाविशिष्टशक्तिविशिष्टकलाविशिष्टब्रह्मबोधकास्तथाचमायाविशिष्टं शक्तिविशिष्टं कलाविशिष्टंयद्ब्रह्मतद्भगवतीपदवाच्यमि
तिफलितोर्थः ॥ एतेनक्षुधारूपेण निद्रारूपेणभ्रांतिरूपेणस्मृतिरूपेणेत्यादिकेवलशक्तिवाचकपदानि व्याख्यातानि तैःपदैस्तत्तच्छक्तिविशिष्टब्रह्मणएवसर्वत्र
ग्रहणात् ॥ अयमेवार्थः कालोत्तरेउक्तः शिवंप्रतिदेवीप्रश्नवाक्येन ॥ भगवन्देवदेवेशमिथ्यामायेति विश्रुता ॥ तस्याः कथमुपास्यत्वंभवेन्मुक्तावन
न्वयात् ॥ श्रद्धानजायतेक्वापि मिथ्यावस्तुनिकुत्रचित् ॥ देव्याउपासनाचेयं श्रुतामायाश्रिताप्रभो ॥ संशयंछिंधिदेवेश रहस्यं वदमेप्रभो ॥ इति
श्रुत्वावचोदेव्याभगवांश्चंद्रशेखरः ॥ उवाचवचनंदिव्यंलोकानांचाहितप्रदम् ॥ नाहंसुमुखिमायायाउपास्यत्वंब्रुवेक्वचित् ॥ मायाधिष्ठानचैतन्यमुपास्यत्वेन
कीर्तितम् ॥ मायाशक्त्यादिशब्दाश्चविशिष्टस्यैवलक्षकाः ॥ तस्मान्मायादिशब्दैस्तुब्रह्मैवोपास्यमुच्यते इति ॥ अत्रपूर्वार्द्धेनमायाधिष्ठानचैतन्येत्यनेन
प्रथमपक्षउक्तोमायाशक्त्यादीत्यनेनोत्तरार्द्धेनद्वितीयः पक्षउपपादितः ॥ एतदभिप्रायेणैवब्रह्माण्डपुराणेमायावाचकस्यह्रींकारस्यमायाविशिष्टब्रह्मवाचकत्व
मुक्तम् ॥ शक्त्यक्षराणिशेषाणिह्रींकारउभयात्मकइति उभयात्मकः शिवशक्त्यात्मक इत्यर्थः ॥ किंचमायायाः केवलाया उपास्यत्वंवदन्वादीभ्रांतः
प्रष्टव्यः ॥ जडायाउपास्यत्वेतत्तद्देवतारूपाणांप्राणेंद्रियमनआत्मजीवादिमत्त्वंकथंभवेत् ॥ द्विविधंहिभगवतीस्वरूपम् ॥ स्थूलंसूक्ष्मंच ॥ तत्रसूक्ष्मंमुख्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थूलंतुतत्तदुपासकानांदर्शनादिव्यवहारार्थंतत्तदुपासकैरुपासितंसूक्ष्मरूपमेवतुस्थूलंरूपंगृह्णाति ॥ तत्रैवंसतिसूक्ष्मरूपेचैतन्याननुप्रवेशेतद्गृहीतेस्थूलरूपेपि
चैतन्यस्याननुप्रवेशेनतत्तद्देवतानांप्राणनसंभाषणादिव्यवहारोच्छेदएवस्यात्तस्मादनिच्छयापिचैतन्यविशिष्टायाएवतत्तच्छक्तेरुपास्यत्वंवक्तव्यमिति ॥ नन्वेवं
चेत्किमर्थंमायादिशब्दैर्व्यवहारो भगवत्याः शास्त्रेषुक्रियते लक्षणादिदोषाभावायस्पष्टप्रतिपत्तयेब्रह्मादिशब्दैरेवकुतोन व्यवहारः क्रियतेइतिचेच्छृणु ॥ चतु
र्व्यूहात्मकंहिब्रह्मणोरूपं विराड्हिरण्यगर्भाव्याकृतब्रह्मरूपंतत्रदेव्युपासनाव्यूहांतर्गतस्यकस्यपदार्थस्येतिशंकायांविराड्हिरण्यगर्भाव्याकृतानांतदधिष्ठातॄणांब्र
ह्मविष्णुरुद्राणांचमैत्रायणीयश्रुतावेकैकगुणमयत्वेनकीर्तनाद्गुणत्रयसाम्यावस्थायाः मायायाः प्रकृत्यादिशब्दवाच्यत्वेनतस्याश्चतुरीयब्रह्माश्रितत्वेनतदेवमा
याविशिष्टंतुरीयंब्रह्मैवभगवत्युपासनायांग्राह्यमितिबृहदर्थप्रकाशनार्थंतथामायादिशब्दैर्व्यवहारस्यकरणात् ॥ तथाचमैत्रायणीश्रुतिः ॥ तमोवाइदमेकमग्रआ
सीत्तत्परेस्यात्तत्परेणेरितंविषमत्वंप्रयात्येतद्वैरजस्तद्रजः खल्वीरितंविषमत्वंप्रयात्येतद्वैसत्वस्यरूपमिति ॥ अनेनवाक्येनमायायास्तमःशब्दितायाः परेण
ब्रह्मणानित्यसंबंधप्रदर्शनेनजगत्कारणरूपंसाम्यावस्थात्मकंप्रदर्शितंनह्यन्यथातमःप्रेरकत्वंसाम्यावस्थमायोपाधिंविनानिर्गुणस्यपरमात्मनःसंभवतिअग्रेचतस्यै
तास्तनवोथयोहखलुवावास्यतामसोंशोसौयोयंरुद्रोयोहखलुवावास्यराजसोंशोसौब्रह्मायोहखलुवावास्यसात्त्विकोंशःसविष्णुरितिगुणत्रयोपाधित्वंब्रह्मविष्णुरु
द्राणांप्रतिपादितम् ॥ तथापुराणादिषुच ॥ सत्त्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तः परः पुरुषएकइहास्यधत्ते ॥ स्थित्यादयोहरिविरिंचिहरेतिसंज्ञाः श्रेयांसि
तत्रखलुसत्त्वतनोर्नृणांस्युरित्यादिसर्वपुराणेषुब्रह्मविष्णुरुद्राणामेकैकगुणवत्त्वमेवप्रतिपादितम् ॥ नहिमायाप्रकृतिशक्त्यादिशब्दवाच्यंवस्तुब्रह्मातिरिक्ताश्रयंभ
वति येनमायादिशब्दैरुपास्यंवस्तुमायाविशिष्टब्रह्मातिरिक्तंभवेत्किंतुमायाविशिष्टब्रह्मरूपमेवेतितैः शब्दैरुपास्यवस्तुनिप्रतिपादिते मायाविशिष्टब्रह्मरूपमेवभग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतीरूपमुपास्यंभवेदितिबोधनार्थमेवमायादिशब्दैर्भगवत्याउपासनकथनमिति ननुतर्हित्वंवैष्णवीशक्तिरनंतवीर्येत्यत्रापिमायाशब्दोब्रह्मविशिष्टमायावाचकः
स्यात् ॥ नचेष्टापत्तिः ॥ तत्रकेवलायामायायाएवविवक्षित्वादितिचेन्न ॥ नह्यस्माभिःसर्वत्रमायाशक्त्यादिशब्देनमायाविशिष्टंशक्तिविशिष्टंब्रह्मैवसर्वत्रग्रा
ह्यमितिशपथःक्रियते येनातिप्रसंगःस्यात्किंतुक्वचित्संबंधिशब्दसमभिव्याहारेकेवलमायाया एवग्रहणंयथात्रैवतथानाशप्रकरणेकेवलमायायाग्रहणंतथासृष्टि
स्थलेपि मन्मायाशक्तिसंक्लृप्तंजगत्सर्वंचराचरम् ॥ सापिमत्तःपृथग्विप्रानास्त्येवपरमार्थतः ॥ इत्यादौकेवलमायायाग्रहणमुपासनास्थलेतुतद्विशिष्टब्रह्मणोग्रहण
मितियथायथमूह्यम् ॥ तथाचत्वंवैष्णवीशक्तिरित्यादौअधिष्ठानकूटस्थब्रह्मरूपिणीयात्वंसावैष्णवीयामायाशक्तिरस्तितद्रूपाअसीत्यर्थः ॥ ब्रह्मणःसर्वाधिष्ठा
नत्वेनसर्वरूपत्वात् ॥ तेनचब्रह्मरूपत्वमेवभगवत्याः प्रतिपादितमेवमन्यत्राप्यूह्यम् ॥ यद्वा ब्रह्मणोजगत्कारणस्योभयात्मकत्वात्क्वचिन्मायोपसर्जनब्र
ह्मणउपासनं तत्रशक्तिःसहायभूता ॥ इदंचमतं शिवपुराणादिषुस्पष्टम् ॥ तस्मात्सहतयादेवंहृदिपश्यंतियेशिवम् ॥ तेषांशाश्वतिकाशांतिर्नेतरेषांकदाचनेति
वचननिचयैः । क्वचिच्चब्रह्मोपसर्जनमायाया उपासनंतत्रभगवतीविषयेब्रह्मोपसर्जनमायायाएवोपासनमितिदर्शयितुंमायाशक्त्यादिशब्दैः शास्त्रेभगवत्या
व्यवहारः क्रियते । इदंचमतंसर्वतंत्राभिमतंपुराणाभिमतंच ॥ शिवेनसहितांदेवींभावयेद्भुवनेश्वरीमितिभुवनेश्वरीपारिजातादिवचननिचयात् ॥ तदुक्तंकूर्म
पुराणे ॥ अस्यास्त्वनादिसंसिद्धमैश्वर्यमतुलंमहत् ॥ तत्संबंधादनंतैषारुद्रेणपरमात्मनेत्यादीनिवचनानिदेवीभागवतादिसर्वपुराणेषुद्रष्टव्यानि ॥ उभयप
क्षेपिब्रह्मणश्चिदंशउपासनायामागतएवेतिनमुक्तावुपास्यस्वरूपानन्वयित्वरूपंदूषणंनवाश्रद्धेयतेति ॥ इत्थं भगवत्युपासनायांस्वरूपेनिर्णीते ब्रह्मविष्णुरुद्रश
क्त्युपासनासुकस्योपासनावरिष्ठेत्यस्यविचारः क्रियते ॥ तत्रसर्वंखल्विदंब्रह्मेतिसामानाधिकरण्येनसर्वपदार्थमात्रस्यब्रह्मरूपत्वेपिभक्तानांचेतसोवलंबाय
परमेश्वरेणमलिनशुद्धशुद्धतरशुद्धतमाविभूतयः शुद्धितारतम्येनकल्पितास्ताश्चगीतादिशास्त्रेषुविभूत्यध्यायेछांदोग्यादिषुचप्राणोब्रह्मादित्योब्रह्ममनोब्रह्मेत्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यैः प्रदर्शिताः ॥ तत्रसर्वविभूतिषुब्रह्मणः समानत्वेनावस्थानेपियथापात्रमणिकृपाणदर्पणादिषुशुद्धितारतम्येनप्रतिबिंबफलनस्यापितारतम्यमेवंविभूति
षुशुद्धितारतम्येनैवब्रह्मणः प्रसादकरणतारतम्यंप्रतिबिंबफलनतारतम्यंचेतियाभिर्याभिर्विभूतिभिर्यथायथाप्रतिबिंबफलनतारतम्यंप्रसादकरणतारतम्यंचभ
वतितथातथातस्याविभूतेरुत्कृष्टत्वमुत्कृष्टतरत्वमुत्कृष्टतमत्वमित्यादिव्यवहारः सर्वशास्त्रप्रसिद्धोनिर्विवादस्तथाचसतिब्रह्मविष्णुरुद्राणामेकैकगुणोपाधित्वे
नैकैकगुणापेक्षयासाम्यावस्थायास्तमःसत्वादिगुणमूलभूतायाः सर्वोत्कृष्टत्वात् ॥ किंचप्रथमतोब्रह्मणिमायातस्याःब्रह्मणोऽव्यवहितःसंबंधस्तदुत्तरंगु
णानामुद्भवान्मायाद्वारकःसंबंधोगुणानामितिसाम्यावस्थायामव्यवहितःसंबंधोब्रह्मणइति सैवोपासनामुख्यासर्वोत्कृष्टाचेति॥ सूतसंहितादिष्वपीयंरीतिरुक्ता॥
परतत्त्वप्रकाशस्तुरुद्रस्यैवमहत्तरः॥ ब्रह्मविष्ण्वादिदेवानांनतथामुनिपुंगवाः इत्यादि॥ रुद्रः कथंचित्कायार्थमनुतेरुद्ररूपताम् ॥ नतथादेवताःसर्वाःपरिस्फू
र्त्यल्पताबलादिति ॥ सूतगीतासु ॥ ननुब्रह्मविष्णुरुद्राणामैकैकगुणोपाधित्वेसर्वसंमतेकथंसाम्यावस्थात्मकत्वेनापितेषांपुराणादिषूपवर्णनमितिचेन्न ॥ तदंत
र्गतब्रह्मणएवसाम्यावस्थात्मकत्वेनतदभेदात्तेषामपितदात्मकत्वकथनमित्याशयात् अतएवतापनीयेनृसिंहस्यसत्वोपहितविष्णोरवतारत्वेश्रुतिपुराणादिनिश्चि
तेपिसाम्यावस्थात्मकत्वेनवर्णनंसंगच्छते॥ तस्मान्मायाशक्त्याख्यब्रह्मरूपभगवत्युपासनैवमुख्यासर्वोत्कृष्टाचेतिसैवसर्वकामार्थिभिर्मुमुक्षुभिश्चोत्कृष्टवस्तूपास
नेच्छुभिराश्रयणीयेत्यर्थात्प्राप्तमपिपुराणांतरवचनैः स्पष्टमुपपाद्यंते ॥ देवीभागवते ॥ ब्रह्मविद्याजगद्धात्रीसर्वेषांजननीतथा ॥ ययासर्वमिदंव्याप्तंत्रैलोक्यं
सचराचरम्॥सैवसेव्याचपूज्याचनान्यद्देवतांतरमिति॥तथातंत्रेषु॥एवंयःपूजयेद्भक्त्याप्रत्यहंपरमेश्वरीम् ॥भुक्त्वाभोगान्यथाकामंदेवीसायुज्यमाप्नुयात् ॥
योनपूजयतेनित्यंचण्डिकांभक्तवत्सलाम् ॥ भस्मीकृत्यास्यपुण्यानिनिर्दहेत्परमेश्वरीति॥ अनेनवचनेनभगवत्युपासनायाःसंध्यादिकर्मवन्नित्यत्वंनित्यपदोच्चा
रणेनस्पष्टमेव बोधितंस्पष्टीकृतंचैतदस्माभिर्देवीभागवतटीकायाम् ॥ तथापुराणांतरे ॥ आराध्यापरमाशक्तिः सर्वैरपिसुरासुरैः ॥ नातःपरतरंकिंचिदधिकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुवनत्रयेइति ॥ तथा ॐकारंपितृरूपेणगायत्रींमातरंतथा ॥ पितरौयोनजानातिसविप्रस्त्वन्यरेतजः ॥ तथाकालोत्तरे ॥ धिग्धिग्धिग्धिक्चतज्जन्मयो
नपूजयतेशिवाम् ॥ जननींसर्वजगतःकरुणारससागरामित्यादिपुराणेषुतंत्रेषुचबहूनिवचनानिद्रष्टव्यानि ॥ विस्तरस्तुमत्कृतशक्तितत्त्वविमर्शिन्यांद्रष्टव्यः ॥
इत्थंशक्तितत्वस्यसर्वोत्कृष्टस्यसर्वैरुपास्यस्योपासनाप्रकाराअधिकारिभेदेनानेकविधाःपूजास्तोत्रजपध्यानलयरूपाः॥ तदुक्तंभुवनेश्वरीसंहितायाम् ॥ पूजाको
टिसमंस्तोत्रंस्तोत्रकोटिसमोजपः॥ जपकोटिसमंध्यानंध्यानकोटिसमोलयइति॥ पूजाचतुःषष्टिसंख्योपचारषोडशोपचारपंचोपचारभेदेनत्रिधा॥ मंत्राश्चमायाबी
जादयोबीजरूपाः गायत्र्यादयोऋग्यूपास्तदतिरिक्ताश्चनवार्णप्रभृतयोवैदिकाः देव्यथर्वशिरसिभुवनेश्वरीतापनीयादिषुप्रसिद्धास्तैत्तिरीयशाखायांच ह्रीश्चतेल
क्ष्मीश्चपत्न्यावितिकंठरवेणैवोपात्तास्तांत्रिकाश्चचतुःषष्टितंत्रेषुप्रसिद्धाएवध्यानलयादयश्चतंत्रेषुयोगशास्त्रेषुश्वेताश्वतरायुपनिषत्सुच ॥ तेध्यानयोगानुगता
अपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिवाक्यैःप्रतिपादितास्तोत्राणिचसप्तशत्यादीनिमार्कंडेयपुराणादिषुप्रसिद्धानि तत्रस्तोत्रेषुस्तोत्रद्वयमेवमुख्यंसप्तशती
रूपंकूर्मपुराणांतर्गतंदेवीसहस्रनामाख्यंच तंत्रेषुबहुधैतयोर्मुख्यत्त्वप्रतिपादनात् ॥ स्तोत्रद्वयेपिसप्तशत्याख्यमेवमुख्यंसर्वेषांश्लोकानांमंत्ररूपत्वाच्चतुःषष्टितंत्रे
ष्वपितस्यैवमुख्यत्वेनप्रतिपादितत्वाच्च ॥ उक्तंचवेदागमे॥ निर्विशेषपरामंत्राः सविशेषपराश्चये॥ प्रत्यध्यायंनिरूढास्तेतेनेयंसर्वतःपरेति॥ रुद्रयामलेच॥ अस्ति
गुह्यतमंदेव्यामाहात्म्यंसर्वसिद्धिदम् ॥ वाक्यैरर्थैश्चपद्यैश्चसप्तशत्याःशुभप्रदम्॥ सविशेषपरंसाक्षाच्चिच्छक्तिमहिमाश्रयम् ॥ तात्पर्यगत्यातत्कृत्स्नंनिर्विशेषचिदा
श्रयमिति ॥ तदुक्तंकात्यायनीतंत्रे॥ अंगहीनोयथादेहीसर्वकर्मसुनक्षमः ॥ अंगषट्कविहीनातुतथासप्तशतीस्तुतिः ॥ तस्मादेतत्पठित्वैवजपेत्सप्तशतींपराम् ॥
अन्यथाशापमाप्नोतिहानिंचैवपदेपदे ॥ रावणाद्यास्तोत्रमेतदंगहीनंनिषेविरे ॥ हतारामेणतेयस्मान्नांगहीनंपठेत्ततइति ॥ तद्यथामतिव्याख्यायते ॥
तत्रकवचांशेब्रह्माणंप्रतिप्रश्नंकरोतिमार्कंडेयः ॥ यद्गुह्यमिति ॥ लोकेयत्परममुत्कृष्टंगुह्यमस्तिरहस्यमस्तितन्मेब्रूहितत्किंब्रह्मरूपंनेत्याह ॥ सर्वरक्षाकरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येनसर्वेषामपिरक्षाभवतिनृणांपामरप्रभृतीनामपितादृशमित्यर्थः ॥ ब्रह्मतूत्तमाधिकारिणामेवरक्षकंनसर्वेषामित्यर्थः ॥ ननुसंत्यन्यानिकवचानिलोकेइतिचे त्सत्यं संति तथापियद्भवताकस्यचित्कस्यापिनाख्यातंनिधिबुद्ध्यास्थापितमस्तितदित्यर्थः ॥ तेनचनिःसंशयमेवरक्षणंझटितिस्यादितिभावः ॥ अन्यथानि धिबुद्ध्यातस्यरक्षणंनिरर्थकंस्यादिति ॥ ननुकिमित्युत्कृष्टंवस्तुमयादेयमितिचेत्तत्राह हेपितामहस्वसंततिरक्षणार्थंपितामहेनावश्यंदेयमित्यर्थः ॥ १ ॥ उत्तर माह ॥ ब्रह्मोवाच ॥ अस्तीति ॥ हेविप्रत्वयायत्पृष्टंतादृशंदेव्यास्तुदेव्याएवकवचंपुण्यमेकंनिधिबुद्ध्यास्थापितमस्तितन्महामुनेशृणुष्व ॥ सर्वभूतोपका रार्थंप्रवृत्तत्वान्महामुनेइतिसंबोधनम् ॥ २ ॥ परंतुसादेवीनवमूर्त्यात्मिकाध्येयेत्यभिप्रायेणतासांमूर्तीनांनामान्याह ॥ प्रथममिति ॥ नामज्ञानेनतद्वाच्याकार स्यप्रसिद्धत्वादेवज्ञानंभविष्यतीतिभावः ॥ सर्वोत्तरैश्वर्यवत्यपिभगवतीशैलेनभक्तेनातितपश्चर्ययाप्रार्थितासतीकारुण्यवशादतिनीचमपिपुत्रीत्वंस्वीकृतवतीत्य

॥ मार्कंडेयउवाच ॥ यद्गुह्यंपरमंलोकेसर्वरक्षाकरंनृणाम् ॥ यन्नकस्यचिदाख्यातंतन्मेब्रूहिपितामह ॥१॥ ॥ ब्रह्मोवाच ॥ ॥ अस्तिगु ह्यतमंविप्रसर्वभूतोपकारकम् ॥ देव्यास्तुकवचंपुण्यंतच्छृणुष्वमहामुने ॥ २॥ प्रथमंशैलपुत्रीतिद्वितीयंब्रह्मचारिणी ॥ तृतीयंचंद्रघंटेति कूष्मांडेतिचतुर्थकम् ॥ ३ ॥

होभक्तवात्सल्यंकियद्वर्णनीयंभगवत्याइतितत्त्वंकूर्मपुराणेस्पष्टमेतत् ॥ ब्रह्मचारिणीति ॥ ब्रह्मसच्चिदानंदरूपंतच्चारयितुंप्रापयितुंशीलंयस्याः साब्रह्मचारिणीब्रह्म रूपप्रदेत्यर्थः॥ चंद्रघंटेति॥ चंद्रोहस्तगतायांघंटायांयस्याश्चंद्रवन्निर्मलावाघंटायस्याःसेत्यर्थः ॥ यद्वा आह्लादकारिणीदेवीचंद्रघंटेतिकीर्तितेतिरहस्यागमोक्ते श्चंद्रंघंटयतिप्रदिवादितयाभाषतेस्वस्याह्लादकारित्वाभिमानेनेतिचंद्रघंटाचंद्रापेक्षयाप्यतिलीलावतीत्यर्थः ॥ पटपुटेतिदंडकपठितस्यचुरादेर्घटिधातोर्भाषा र्थस्यपचाद्यचिरूपं चंद्रस्यघंटाचंद्रघंटा ॥ कूष्मांडेति ॥ कुत्सितऊष्मासंतापस्तापत्रयरूपोयस्मिन्संसारेससंसारःकूष्मा सोंडेमांसपेश्यामुदररूपायांयस्याः साकूष्मांडातापत्रययुक्तसंसारभक्षणकर्त्रीत्यर्थः ॥ अंडःपेशीचमुष्कंचेतिमेदिनी ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कंदेति ॥ सनत्कुमारस्यभगवतीवीर्यादुद्भूतस्यस्कंदइतिसंज्ञाभगवान्सनत्कुमारस्तंस्कंदइत्याचक्षतेइतिछांदोग्यश्रुतेस्तथाचज्ञातिभिर्यदुदरेजन्माभिलषणीयमित्यतिशुद्धेत्यर्थः॥ कात्यायनीति। देवकार्यार्थंकात्यायनाश्रमेआविर्भूतातेनकन्यात्वेनस्वीकृतेतिकात्यायनीतिनामभगवत्याः ॥ अस्यानिरंतरंकुमारीत्वेनपत्यनधीनतयास्वतंत्रत्वंबोधितम् ॥ कालरात्रीति ॥ सर्वमारकस्यकालस्यापिरात्रिर्नाशिकेत्यर्थः। प्रलयेकालस्यापिनाशात् ॥ कृदिकारादक्तिनइतिङीष् ॥ महागौरीति ॥ इयं चमहामानिनीनर्मोक्त्याशिवेनकालीत्युक्तेतपसागौरवर्णस्यसंपादितत्वात्कालीपुराणेस्पष्टमेतत् ॥ ४ ॥ सिद्धिदेति ॥ इतीतिशेषः ॥ सिद्धिदाइतिनवममित्यन्वयः ॥ मोक्षदेत्यर्थः ॥ नवदुर्गाइति ॥ योगिनःकायव्यूहवदेकस्याएवदुर्गायाएतेतवभेदायेशास्त्रेध्येयत्वेनप्रोक्तास्तेमयाकीर्तिताइत्यर्थः ॥ अतएव

पंचमंस्कंदमातेतिषष्ठंकात्यायनीतिच ॥ सप्तमंकालरात्रीतिमहागौरीतिचाष्टमम् ॥ ४ ॥ नवमंसिद्धिदाप्रोक्तानवदुर्गाःप्रकीर्त्तिताः ॥ उक्तान्येतानिनामानिब्रह्मणैवमहात्मना ॥ ५ ॥ अग्निनादह्यमानस्तुशत्रुमध्येगतोरणे ॥ विषमेदुर्गमेचैवभयार्त्ताःशरणंगताः ॥ ६ ॥ नतेषांजायतेकिंचिदशुभंरणसंकटे ॥ नापदंतस्यपश्यामिशोकदुःखभयंनहि ॥ ७ ॥

देव्यास्तुकवचंपुण्यमित्येकवचनंसंगच्छते ॥ नाम्नांस्वकल्पितत्वशंकाव्युदासार्थमाह ॥ उक्तान्येतानीति ॥ महात्मनासर्वज्ञेनब्रह्मणैववेदेनैवेतान्युक्तानीत्यर्थः ॥ ५ ॥ इत्थंकवचपाठेध्येयदेवतास्वरूपंगुणंचप्रदर्श्यतत्फलेअविश्वासोनैवकर्तव्यइतिकैमुतिकन्यायेनाह ॥ अग्निनेति ॥ योग्निनादह्यमानोरणेशत्रुमध्येचगतः सन्शरणंगतइतिशेषः ॥ अथयेविषमेदुर्गमेचातिसंकटेभयार्त्ताः भयपीडिताः संतःशरणंगताः ॥ ६ ॥ तेषांतस्यचभक्तिरहितेनस्मरणमात्रेणापितज्जन्यंभयादिकंनभवतीत्याह ॥ तत्तेषामिति ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यैस्तुभक्त्यास्मृताभवतितेषांपूर्वोक्तंफलमृद्धिधर्मार्थकाममोक्षाणांचभवतीत्यत्रकिंवक्तव्यमित्याह ॥ यैस्त्विति ॥ इदानींदेव्याअतिवात्सल्यंभक्त्युत्पादनार्थं
दर्शयति ॥ प्रेतसंस्थेतिश्लोकद्वयेन ॥ ८ ॥ ९ ॥ ब्राह्मीत्यंतंसप्तमातॄणांवर्णनम् ॥ नानेतिवक्ष्यमाणदेवीनांवर्णनम् ॥ १० ॥ दृश्यंतेइति ॥ सप्तमातृ
भिन्नाःयाश्चदेव्यस्ताअपिभक्तरक्षणार्थंक्रोधसमाकुलाः रथमारूढाः जात्यैकवचनं रथानारूढादृश्यंतेअर्थाद्देवादिभिरितिबोध्यम् ॥ तासामायुधान्याह ॥
शंखमितिसार्धेन ॥ ११ ॥ १२ ॥ दैत्यानामिति ॥ ताःसप्तमातरश्चशंखंचक्रमित्यादिश्लोकोक्तानीत्थमायुधानिधारयंति ॥ किमर्थम् ॥ दैत्यानां

यैस्तुभक्त्यास्मृतानूनंतेषामृद्धिःप्रजायते ॥ प्रेतसंस्थातुचामुंडावाराहीमहिषासना ॥ ८ ॥ ऐंद्रीगजसमारूढावैष्णवीगरुडासना ॥ माहे
श्वरीवृषारूढाकौमारीशिखिवाहना ॥ ९ ॥ ब्राह्मीहंससमारूढासर्वाभरणभूषिता ॥ नानाभरणशोभाढ्यानानारत्नोपशोभिताः ॥ १० ॥
दृश्यंतेरथमारूढादेव्यःक्रोधसमाकुलाः ॥ शंखंचक्रंगदांशक्तिंहलंचमुसलायुधम् ॥ ११ ॥ खेटकंतोमरंचैवपरशुंपाशमेवच ॥ कुंतायु
धंत्रिशूलंचशार्ङ्गायुधमनुत्तमम् ॥ १२ ॥ दैत्यानांदेहनाशायभक्तानामभयायच ॥ धारयंत्यायुधानीत्थंदेवानांचहितायवै ॥ १३ ॥
महाबलेमहोत्साहेमहाभयविनाशिनि ॥ त्राहिमांदेविदुष्प्रेक्ष्येशत्रूणांभयवर्द्धिनि ॥ १४ ॥

देहनाशार्थंभक्ताभयार्थंदेवहितार्थंचेत्यर्थः ॥ अयंभावः ॥ अप्रार्थिताअपिएतामहत्योदेवताजगद्रक्षणेवत्सलतयैवप्रवृत्तामातृवत्ताः कुतोनमंदभाग्येनस्वर
क्षणार्थंप्रार्थ्यंतेइति ॥ १३ ॥ कवचपाठस्यादाविमंप्रार्थनामंत्रंपठित्वापश्चात्कवचंपठनीयमित्यभिप्रायेणाह ॥ महाबलेइति ॥ महद्बलंमायाशक्तिरूपं
यस्याः महानुत्साहोजगद्रक्षणेयस्याः महाभयंमृत्युरूपंतस्यज्ञानदानेननाशिनी । दुष्प्रेक्ष्येदुर्दर्शनीयेनसंदृशेतिष्ठतिरूपमस्येतिश्रुतेः । शत्रूणांकामक्रो
धादिकानाम् ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राच्यामिति ॥ प्राच्यांदिशिस्थिताऐंद्रीइंद्रशक्तिर्मांरक्षत्वित्यन्वयः ॥ प्राच्यांस्थितंमामितिवाएवमुत्तरत्रापि॥शक्तिशक्तिमतोरभेदादग्निरूपादेवताअग्निशक्तिरित्यर्थः । अत्ररक्षत्वित्यनुवृत्तिः ॥ वरान् श्रेष्ठानप्याहंतिसवराहो यमः आर्षःप्रयोगः तस्यशक्तिर्वाराही अण्णंतान्ङीप्॥यमशक्तिरित्यर्थः॥दशदिक्पालप्रकरणात् ॥ सप्तमात्रंतर्गतावावाराहीहेवाराहिदक्षिणेदेशेस्थितात्वंमांरक्षेत्यर्थः ॥ स्थितंमामिति ॥ खड्गधारिणीनिर्ऋतिशक्तिरित्यर्थः ॥ रक्षत्वित्यस्यमध्येमध्येविच्छेदादध्याहारः कर्तव्यः ॥ १५ ॥ मृगवाहिनीवायुदेवतायामृगवाहनत्वाद्वायुशक्तिरित्यर्थः ॥ रक्षेदित्यनुवृत्तिः ॥ कुत्सितः मारःमदःयस्यसः

प्राच्यांरक्षतुमामैंद्रीआग्नेय्यामग्निदेवता ॥ दक्षिणेरक्षवाराहिनैर्ऋत्यांखड्गधारिणी ॥ १५ ॥ प्रतीच्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी ॥ उदीच्यांरक्षकौमारीईशान्यांशूलधारिणी ॥ १६ ॥ ऊर्द्ध्वंब्रह्माणिमेरक्षेदधस्ताद्वैष्णवीतथा ॥ एवंदशदिशोरक्षेच्चामुंडाशववाहना॥ १७॥ जयामेचाग्रतःस्थातुविजयास्थातुपृष्ठतः ॥ अजितावामपार्श्वेतुदक्षिणेचापराजिता ॥ १८ ॥

कुमारःकुबेरस्तस्येयंशक्तिःकौमारी दिक्पालप्रकरणात् ॥ यद्यपिकौबेर्यारक्षणस्थानमग्रेवक्ष्यमाणमस्तितथाप्येकस्याएवस्थानद्वयरक्षकत्वेबाधकाभावः ॥ सप्तमात्रंतर्गतावा ॥ शूलधारिणीशानशक्तिरित्यर्थः ॥ १६ ॥ ऊर्ध्वमिति ॥ ब्रह्माणमानयतिजीवयतीतिकर्मण्यण् ॥ हेब्रह्माणिऊर्ध्वंस्थिताभवतीमेमांरक्षेदित्यर्थः ॥ मेऊर्ध्वंभागमितिवा ॥ एवमिति ॥ दिक्पालदेवतावदेवमेमत्संबंधिनीर्दशदिशश्चामुंडारक्षेदित्यर्थः ॥ दशदिक्षुस्थिताचामुंडामांरक्षेदितिपर्यवसितोर्थः ॥ अन्यथाकेवलदिशांरक्षणेप्रयोजनाभावः ॥ १७ ॥ जयाशक्तिःस्थातुतिष्ठतुमत्संरक्षणार्थम् आर्षःप्रयोगः ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिखामिति ॥ उद्योतिनीनामिकादेवीममशिखायांस्थितासतीमच्छिखांरक्षेदितिसर्वत्रयोज्यम् ॥ उमामूर्ध्निव्यवस्थितासतीमूर्धानंरक्षेदित्यर्थः ॥ एवंसर्वत्रयथायोग्यमध्याहार्यम् ॥ १९ ॥ नासिकेनासापुटेत्यर्थः ॥ उत्तरत्रनासिकाशब्देननासिकादंडइति ॥ २० ॥ २१ ॥ अधरेअधरोष्ठेइत्यर्थः ॥ २२ ॥ ॥ २३ ॥ कंठस्यबहिर्भागोबहिष्कंठः ॥ नलिकांकंठनालम् ॥ २४ ॥ स्कंधमारभ्यकूर्परपर्यंतोभागोबाहुस्तदारभ्यांगुलिपर्यंतोभागोहस्तः ॥ २५ ॥

शिखामुद्योतिनीरक्षेदुमामूर्ध्निव्यवस्थिता ॥ मालाधरीललाटेचभ्रुवौरक्षेद्यशस्विनी ॥ १९ ॥ त्रिनेत्राचभ्रुवोर्मध्येयमघंटाचनासिके ॥ शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी ॥२०॥ कपोलौकालिकारक्षेत्कर्णमूलेतुशांकरी ॥ नासिकायांसुगंधाचउत्तरोष्ठेचचर्चिका॥२१॥ अधरेचामृतकलाजिह्वायांचसरस्वती ॥ दंतान्रक्षतुकौमारीकंठदेशेतुचंडिका ॥२२॥ घंटिकाचित्रघंटाचमहामायाचतालुके ॥ कामाक्षी चिबुकंरक्षेद्वाचंमेसर्वमंगला ॥ २३ ॥ ग्रीवायांभद्रकालीचपृष्ठवंशेधनुर्धरी ॥ नीलग्रीवाबहिःकंठेनलिकांनलकूबरी ॥ २४ ॥ खड्गधारिण्युभौस्कंधौबाहूमेवज्रधारिणी ॥ हस्तयोर्दंडिनीरक्षेदंबिकाचांगुलीषुच ॥ २५ ॥ नखाञ्छूलेश्वरीरक्षेत्कुक्षौरक्षेन्नलेश्वरी ॥ स्तनौरक्षेन्महादेवीमनःशोकविनाशिनी ॥ २६ ॥ हृदयंललितादेवीह्युदरंशूलधारिणी ॥ नाभिंचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा ॥ २७ ॥ भूतनाथाचमेढ्रंचऊरूमहिषवाहिनी ॥ कट्यांभगवतीरक्षेज्जानुनीविंध्यवासिनी ॥ २८ ॥

कुक्षाविति सम्यंतःपाठःप्राचीनसंमतः ॥ २६ ॥ २७ ॥ मेढ्रंलिंगम् ॥ मेढ्रोमेहनशेफसीतिकोशः ॥ गुदंमहिषवाहिनीत्यपपाठः ॥ ऊरूमहिषवाहिनीतिपाठःसम्यक् ॥ गुह्यंगुह्येश्वरीतिपूर्वोक्तविरोधात् जानुस्थानात्पूर्वमूरुस्थानस्यैवसत्त्वाच्च ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोक्तागमादिशास्त्रेषुयामहाबलासेत्यर्थः ॥ २९ ॥ पादाधःइतिभिन्नंपदम् ॥ तलवासिनीपातालतलवासिनीत्यर्थः ॥ यद्यपिनखाञ्छूलेश्वरीरक्षेदि
त्यत्रनखरक्षणमुक्तंतथापियथैकस्याअपिदेवतायाःस्थानद्वयरक्षकत्वंनविरुध्यते तथैवदेवताद्वयस्यैकस्थाननिरूपितरक्षकत्वेबाधकाभावइत्यभिप्रायेणनखान्
दंष्ट्राकरालीचेत्युक्तम् ॥ ३० ॥ ३१ ॥ पद्मकोशेपद्महृदयादिरूपमेवकोशोवासस्थानंयस्यश्वासस्यतस्मिन्वातेस्थितासतीतंरक्षतुइतियावत्इतिकेचित् ॥
अग्रेप्राणानांरक्षणकथनात्पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुखमितिश्रुत्युक्तंहृदयमेवपद्मकोशशब्देनग्राह्यमित्यपरे ॥ आंत्राणि अम्धातोःक्रेऽनुनासिकस्य

जंघेमहाबलाप्रोक्ताजानुमध्येविनायकी ॥ गुल्फयोर्नारसिंहीचपादपृष्ठेमितौजसी ॥ २९ ॥ पादांगुलीःश्रीधरीचपादाधस्तलवासिनी ॥
नखान्दंष्ट्राकरालीचकेशांश्चैवोर्द्धकेशिनी ॥ ३० ॥ रोमकूपानिकौबेरीत्वचंवागीश्वरीतथा ॥ रक्तमज्जावसामांसान्यस्थिमेदांसिपार्वती ॥
॥ ३१ ॥ आंत्राणिकालरात्रिश्चपित्तंचमुकुटेश्वरी ॥ पद्मावतीपद्मकोशेकफेचूडामणिस्तथा ॥ ३२ ॥ ज्वालामुखीनखज्वालामभेद्यासर्व
संधिषु॥शुक्रंब्रह्माणिरक्षेच्चच्छायांछत्रेश्वरीतथा ॥३३॥ अहंकारंमनोबुद्धिंरक्षमेधर्मचारिणि ॥ प्राणापानौतथाव्यानमुदानंचसमानकम् ॥
॥ ३४ ॥ यशःकीर्त्तिंचलक्ष्मींचसदारक्षतुचक्रिणी ॥ गोत्रमिंद्राणिमेरक्षेत्पशून्मेरक्षचंडिके ॥ ३५ ॥

क्कीतिदीर्घः॥चूडामणिनाम्नीदेवतारक्तासुरवधेप्रसिद्धा ॥ ३२ ॥ नखज्वालांनखनिष्ठंतेजः ॥ अभेद्यानाम्नीसर्वसंधिषुस्थितासतीसर्वसंधीन्रक्षेदित्यर्थः ॥ हे
ब्रह्माणिभवतीमेशुक्रंरक्षेदित्यर्थः॥ ३३ ॥हेधर्मचारिणिअत्रत्वमित्यध्याहारः रक्षेतिमध्यमपुरुषात्॥ ३४ ॥यशःकीर्तिमिति ॥ अत्रयद्यपियशःकीर्तिःसमज्ञाचे
त्यमरोक्तेर्यशःकीर्तिशब्दौएकार्थप्रतिपादकौ तथापि॥सजीवतियशोयस्यकीर्तिर्यस्यसजीवति॥यशःकीर्तिपरिभ्रष्टोजीवबद्धोनजीवति ॥ इत्यादिप्रयोगानुरो
धात् ॥ दानादिप्रभवाकीर्तिः शौर्यादिप्रभवंयशः इतिभेदः॥केचित्तुस्वल्पदेशव्याप्तंयशः बहुदेशव्यापिकाकीर्तिरिति॥हेइन्द्राणिभवतीत्यध्याहारः॥ ३५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ३६ ॥ रक्षेदिति ॥ यत्स्थानंरक्षयाहीनं कुतइतिचेत्कवचेनतुविवर्जितम् ॥ कवचेतस्यस्थानस्योहोनकृतः ॥ तत्सर्वंरक्षमेदेवियतस्त्वंजयंतीसर्वोत्कृष्टापापना
शिनीभवसि ॥ ३७ ॥ अथपितामहः फलस्तुतिंवक्तुमधिकारिणंप्रथममुपदिशति ॥ पदमेकमिति ॥ यदिशुभमात्मनइच्छेत्तर्हिसपुरुषः कवचेनरहि
तः एकंपदमपिनगच्छेदितिक्षणमात्रमपिदेवीस्मरणंविनानक्षपणीयमितितात्पर्यम् ॥ तदुक्तंपुराणेषु ॥ स्वपंस्तिष्ठन्व्रजन्मार्गेप्रलपन् भोजनेरतः ॥ कीर्तये
पुत्रान्रक्षेन्महालक्ष्मीर्भार्यांरक्षतुभैरवी ॥ मार्गंक्षेमकरीरक्षेद्विजयासर्वतःस्थिता ॥ ३६॥ रक्षाहीनंतुयत्स्थानंकवचेनविवर्जितम् ॥ तत्सर्वं
रक्षमेदेवीजयंतीपापनाशिनी ॥ ३७ ॥ पदमेकंनगच्छेत्तुयदीच्छेच्छुभमात्मनः ॥ कवचेनावृतोनित्यंयत्रयत्राहिगच्छति॥३८॥तत्रतत्रार्थ
लाभश्चविजयःसार्वकामिकः ॥ यंयंकामयतेकामंतंतंप्राप्नोतिनिश्चितम् ॥ ३९ ॥ परमैश्वर्यमतुलंप्राप्स्यतेभूतलेपुनः ॥ निर्भयोजायते
मर्त्यःसंग्रामेष्वपराजितः ॥ ४० ॥ त्रैलोक्येतुभवेत्पूज्यःकवचेनावृतःपुमान् ॥ इदंतुदेव्याःकवचंदेवानामपिदुर्लभम् ॥ ४१ ॥ यःपठे
त्प्रयतोनित्यंत्रिसंध्यंश्रद्धयान्वितः ॥ दैवीकलाभवेत्तस्यत्रैलोक्येचापराजितः ॥ ४२ ॥ जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः ॥ नश्यं
तिव्याधयःसर्वेलूताविस्फोटकादयः ॥ ४३ ॥ स्थावरंजंगमंवापिकृत्रिमंचापियद्विषम् ॥ अभिचाराणिसर्वाणिमंत्रयंत्राणिभूतले ॥ ४४ ॥
भूचराःखेचराश्चैवजलजाश्चौपदेशिकाः ॥ सहजाःकुलजामालाडाकिनीशाकिनीतथा ॥ ४५ ॥

त्सततंदेवींसवैमुच्येतबंधनात् इति ॥ इत्युपदिश्यफलंकथयति ॥ कवचेनेत्यादिना ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ दैवीकलाचित्कला
॥ ४२ ॥ ४३ ॥ स्थावरंवत्सनाभादि ॥ जंगमंसर्पादि ॥ कृत्रिमंपरस्परयोगजन्यम् ॥ यथातुल्यपरिमाणयोर्मधुसर्पिषोर्योगादिजम् ॥ अभिचाराणिपर
कृतानि ॥ ४४ ॥ कुलजादयोदुष्टदेवताजातिभेदाः ॥ औपदेशिकाः उपदेशेनतन्मात्रेणयेसिध्यंतितेक्षुद्रदेवताभेदाः ॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ४६ ॥ ४७ ॥ राज्ञःसकाशादित्यर्थः ॥ ४८ ॥ अधुनासप्तशत्यंगत्वंकवचस्याविधत्ते ॥ जपेदिति ॥ पुराप्रथमतः ॥ अनंतनागोयावद्भूमंडलंधत्तेधारय
तितावदित्यर्थः॥४९॥परमंस्थानंमोक्षरूपंज्ञानद्वाराप्राप्नोतिनियमेन ॥ ५० ॥ महामायासर्वकारणंमायाशबलंब्रह्मतस्याः प्रसादतः ॥ यमेवैषवृणुतेते
नलभ्यस्तस्यैषआत्माविवृणुतेतनुंस्वामितिश्रुतेः ॥ यएतांमायाशक्तिंवेदसमृत्युंजयतिसपाप्मानंतरतिसोमृतत्वंचगच्छतीतिश्रुतेः ॥ अहमेवस्वयमिदंवदामि
जुष्टंदेवेभिरुतमानुषेभिरितिश्रुतेश्च॥ पार्वतीपरमाविद्याब्रह्मविद्याप्रदायिनी॥विशेषेणैवजंतूनांनात्रसंदेहकारणमितिसूतसंहितोक्तेश्च ॥कवचेस्मिन्सार्धपंचाशत्सं
ख्याश्लोकसंग्रहःइतिवाराहीतंत्रे॥स्पष्टंचेदंगुप्तवत्यामुपोद्घाते ॥ आधिक्यन्यूनतादोषपरिहारजिहीर्षया॥देवीनाम्नांक्रमस्यापिकथनंक्रियतेमया ॥तेचश्लोकाः

अंतरिक्षचराघोराडाकिन्यश्चमहाबलाः ॥ ग्रहभूतपिशाचाश्चयक्षगंधर्वराक्षसाः ॥ ४६ ॥ ब्रह्मराक्षसवेतालाःकूष्मांडाभैरवादयः ॥ नश्यं
तिदर्शनात्तस्यकवचेहृदिसंस्थिते ॥ ४७ ॥ मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरंपरम् ॥ यशसावर्धतेसोपिकीर्त्तिमंडितभूतले ॥ ४८॥ जपे
त्सप्तशतींचंडींकृत्वातुकवचंपुरा ॥ यावद्भूमंडलंधत्तेसशैलवनकाननम् ॥ ४९ ॥ तावत्तिष्ठतिमेदिन्यांसंततिःपुत्रपौत्रिकी ॥ देहांतेपरमं
स्थानंयत्सुरैरपिदुर्लभम् ॥ ५० ॥ प्राप्नोतिपुरुषोनित्यंमहामायाप्रसादतः ॥ इतितंत्रोक्तंदेव्याःकवचम् ॥ १ ॥ ॥ ॥

प्राचीनग्रंथस्थाःसांप्रदायिकाएवलिख्यंते ॥ दशदिक्पालदेव्यश्चचामुंडाचततःपरम् ॥ जयाचविजयाचैवाप्यजिताचापराजिता ॥ १ ॥ उद्योतिनीततश्चो
मामालाधारीयशस्विनी ॥ त्रिनेत्रायमघंटाचशंखिनीद्वारवासिनी॥ २॥कालिकाशांकरीपश्चात्सुगंधाचर्चिकातथा ॥ अमृतादिकलापश्चात्ततःस्यात्सुसरस्वती
॥ ३ ॥ कौमारीचंडिकाचित्रघंटामायामहादिका॥कामाक्ष्यनंतरंसर्वमंगलाभद्रकालिका॥ ४ ॥धनुर्धरीनीलग्रीवाततःस्यान्नलकूबरी ॥खड्गधारिणिकापूर्वंव
ज्रधारिण्यनंतरम् ॥ ५ ॥ दंडिनीचांबिकामूलेशानीस्यात्तुबलेश्वरी ॥मनःशोकविनाशास्याल्ललिताशूलधारिणी ॥६॥ कामिनीगुह्यपूर्वास्यादीश्वरीचततः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परम् ॥ भूतनाथाततः स्यात्तुमहामहिषवाहिनी ॥ ७ ॥ भगवत्यपिविंध्यस्थामहापूर्वाबलातथा ॥ विनायकीनारसिंहीततःपश्चान्मितौजसी ॥ ८ ॥ श्रीध
र्यंतेचपातालवासिन्यंतेकरालिनी ॥ ऊर्ध्वकेशीचकौबेरीवागीशीपार्वतीतथा ॥९॥ कालरात्रिश्चमुकुटेशानीपद्मावतीतथा ॥ चूडामणिस्तथाज्वालामुख्य
भेद्याततःस्मृता ॥ १० ॥ ब्रह्माणीछत्रपूर्वास्यादीश्वरीधर्मचारिणी॥ चक्रिणींद्रवधूश्चंडीमहालक्ष्मीश्चभैरवी ॥ ११ ॥ क्षेमंपूर्वाकरीपश्चाद्विजयाचजयंतिका॥
इत्येताः सम्यगाख्याताः कवचस्थाश्चशक्तयः ॥ १२ ॥ इति श्रीशैवोपनामकरंगभट्टसुतलक्ष्मीगर्भजनीलकंठभट्टकृतंसप्तशत्यंगकवचविवरणंसमाप्तम् ॥ १ ॥
॥अथार्गलाव्याख्यानम् ॥तत्रप्रथमतोदेवतायाध्यानोपयोगिगुणानाह ॥ जयंतीति ॥ जयंतीसर्वोत्कृष्टेत्यर्थः ॥ गुणत्रयसाम्यावस्थोपाधिकब्रह्मरूपिण्याभग
वत्याः सर्वकारणत्वात् ॥ मंगलामंगंजननमरणादिरूपंसर्पणंलातिगृह्णातिनाशयतिसामोक्षप्रदामंगलेत्युच्यते । नतस्यप्राणाउत्क्रामंति इतिश्रुतेः ॥ कलयति

मार्कंडेयउवाच ॥ जयंतीमंगलाकालीभद्रकालीकपालिनी ॥ दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते ॥ १ ॥

भक्षयंतिसर्वमेतत्प्रलयकालेइतिकाली ॥ ब्रह्मक्षत्रंचोभेभवतओदनोमृत्युर्यस्योपसेचनमितिश्रुतेः ॥ भद्रंमंगलंसुखंकलयतिस्वीकरोतिभक्तेभ्योदातुमितिभद्र
काली॥भद्रकालीसुखप्रदेतिरहस्यागमेर्थकथनात्कपालोस्त्रीशिरोस्थिनस्याद्घटादेः शकलेंबुजेइतिमेदिनीकोशाद्ब्रह्मादीन्निहत्यतेषांकपालंगृहीत्वाप्रलयकालेअ
टतीतिकपालिनी ॥ प्रपंचरूपांबुजंहस्तेयस्याइतिवा ॥ कपालिनीमत्वर्थीयइनिः ॥ प्रपंचांबुजहस्ताचकपालिन्युच्यतेपरेतिरहस्यागमे ॥ दुःखेनाष्टांगयो
गसर्वकर्मोपासनारूपेणक्लेशेनगम्यतेप्राप्यतेसादुर्गा ॥ तांदुर्गांदुर्गमांदेवींदुराचारविघातिनींमितिदेव्यथर्वशिरसि ॥ क्षमाभक्तानामन्येषांवासर्वानपराधान्क्ष
मतेसहतेजननीत्वात्सातिशयकारुण्यवतीक्षमेत्युच्यते ॥ शिवाचिद्रूपिणीत्यर्थः ॥ चिन्मात्राश्रयमायायाःशक्त्याकारेद्विजोत्तमाः ॥ अनुप्रविष्टायासंवि
न्निर्विकल्पास्वयंप्रभा ॥ सदाकारासदानंदासंसारोच्छेदकारिणी ॥ साशिवापरमादेवीशिवाभिन्नाशिवंकरीतिसूतसंहितोक्तेः॥ धात्रीसर्वप्रपंचधारणकर्त्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूप = परमात्मवस्तु ; जय = देहस्थितिरूपि ;

अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ॥ अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नीअहमश्विनोभाइत्यादिश्रुतेः ॥ स्वाहादेवपोषिणी ॥ स्वधापितृपोषिणी ॥ एतादृशपूर्वोक्तमहागुणवतीयात्वमसिततस्तेतुभ्यंनमोनमस्कारएवास्तुकेवलं नतुतादृश्याःपरिचर्यायाःसामर्थ्यमस्तीतिभावः ॥ १ ॥ मध्विति ॥ मधुकैटभयोर्विद्राविणीनाशिनीचसाविधातुर्वरदाचेत्यर्थः ॥ मधुकैटभनाशार्थंब्रह्मणास्तुतासतीतस्मैवरंददाविति कथादेवीभागवतेप्रथमस्कंधे प्रसिद्धा ॥ रूप्यतेज्ञायतेइतिरूपंपरमात्मवस्तु ॥ रूपंभवेद्बिंदुरमंदकांतिरित्यागमात् ॥ तद्देहिमह्यम् ॥ यत्कृतनमस्कारेणैवप्रसन्नासतीतथाजयंजयत्यनेनपरमात्मनःस्वरूपमिति ॥ जयोवेदस्मृतिराशिस्ततोजयमुदीरयेदित्यत्रप्रसिद्धः ॥ तंदेहियशोदेहि ॥ सहनौयशइतिश्रुतिप्रसिद्धं तत्वज्ञानसंपादनजन्यंयशः ॥

मधुकैटभविद्राविविधातृवरदेनमः ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥२॥ महिषासुरनिर्नाशंविधात्रिवरदेनमः ॥ रूपंदेहि० ॥ ३ ॥ वंदितांघ्रियुगेदेविदेविसौभाग्यदायिनि ॥ रूपं० ॥ ४ ॥ रक्तबीजवधेदेविचंडमुंडविनाशिनि ॥ रूपं० ॥ ५ ॥ अचिंत्यरूपचरिते सर्वशत्रुविनाशिनि ॥ रूपं० ॥ ६ ॥ नतेभ्यःसर्वदाभक्त्याचंडिकेप्रणतायमे ॥ रूपं० ॥ ७ ॥

तद्देहि ॥ द्विषःकामक्रोधादिशत्रून् जहिनाशय ॥२॥ महिषेति ॥ महिषासुरस्यनिर्नाशस्तस्यविधात्रीकर्त्रीत्यर्थः ॥ वरदेइतिपृथक्पदम् ॥३॥ वंदितेति ॥ ब्रह्मविष्णवादिभिर्वंदितमंघ्रियुगंयस्यास्तेषामेतदपेक्षयान्यूनोपाधिकत्वात् ॥ भक्त्यतिशयेनदेवीत्यस्यपुनरावृत्तिः ॥ ४ ॥ रक्तेति ॥ रक्तबीजस्यवधः कर्तव्यतयाअस्तियस्याः सा ॥ अर्शआद्यजंतम् ॥ रक्तबीजवधकर्त्रीत्यर्थः ॥ रक्तबीजस्यवधोयस्याःसकाशादितिवा ॥ अत्रनिशुंभशुंभेतिश्लोकपाठोऽपपाठः ॥ प्राचीनैरव्याख्यानात् ॥ प्राचीनपुस्तकेष्वपाठाच्च ॥ ५ ॥ अचिंत्येति ॥ यतोवाचोनिवर्तंतइतिश्रुतेः ॥ योअस्याध्यक्षः परमेव्योमन्त्सोंगवेदयदिवानवेदेतिश्रुतेः ॥ ६ ॥ नेति ॥ सदासर्वदाभक्त्यानतेभ्यःप्रणतेभ्योमेप्रणतायचरूपंदेहीत्यन्वयः ॥ ७ ॥

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ८ ॥ येत्वांमर्चयंतितेभ्यइतिशेषः ॥ ९ ॥ सौभाग्यंदेहि ॥ अर्थान्मह्यम् ॥ १० ॥ विधेहीतिउच्चकैःअतिशयेनोच्चंबलंममविधेहि ॥ ११ ॥ १२ ॥ विद्यावंतमिति ॥ ब्रह्मविद्यावंतंजनंस्वभक्तंकुरुअथचरूपंदेहीत्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥ कृष्णेनेति ॥ इयंकथादेवीभागवतेप्रसिद्धा ॥ १६ ॥ हिमाचलसुतानाथःशिवस्तेनपूजिते ॥ १७ ॥ सुरेति ॥ अनेनचदेवीस्वरूपदर्शनेननिर्वैरता अद्वैतभावश्चभवतीतिध्वनितम् सुरासुरयोःसामानाधिकरण्यकथ

स्तुवद्भ्योभक्तिपूर्वंत्वांचंडिकेव्याधिनाशिनि ॥ रूपं० ॥ ८ ॥ चंडिकेसततंयेत्वामर्चयंतीहभक्तितः ॥ रूपं० ॥९॥ देहिसौभाग्यमारोग्यं देहिदेविपरंसुखम् ॥ रूपं० ॥ १० ॥ विधेहिद्विषतांनाशंविधेहिबलमुच्चकैः ॥ रूपं०॥ ११ ॥ विधेहिदेविकल्याणंविधेहिविपुलांश्रियम् ॥ रूपं० ॥ १२ ॥ विद्यावंतंयशस्वंतंलक्ष्मीवंतंजनंकुरु ॥ रूपं० ॥ १३ ॥ प्रचंडदैत्यदर्पघ्नेचंडिकेप्रणतायमे ॥ रूपं० ॥ १४ ॥ चतुर्भुजे चतुर्वक्त्रसंस्तुतेपरमेश्वरि ॥ रूपं० ॥ १५ ॥ कृष्णेनसंस्तुतेदेविशश्वद्भक्त्यात्वमंबिके ॥ रूपं० ॥ १६ ॥ हिमाचलसुतानाथपूजितेपरमेश्वरि ॥ रूपं० ॥ १७ ॥ सुरासुरशिरोरत्ननिघृष्टचरणेंबिके ॥ रूपं० ॥ १८ ॥ इंद्राणीपतिसद्भावपूजितेपरमेश्वरि ॥ रूपं० ॥ १९ ॥ देवि प्रचंडदोर्दंडदैत्यदर्पविनाशिशि ॥ रूपं० ॥ २० ॥ देविभक्तजनोद्दामदत्तानंदोदयेंबिके ॥ रूपं ॥२१॥ पत्नींमनोरमांदेहिमनोवृत्तानुसारिणीम् ॥ तारिणींदुर्गसंसारसागरस्यकुलोद्भवाम् ॥ २२ ॥

नात् ॥ १८ ॥इंद्राणीति ॥ इंद्राणीपतिनासद्भावेनपूजिते ॥ १९ ॥ २० ॥ भक्तजनेषुयेउद्दामास्तेभ्योदत्तआनंदोदयोमोक्षोयया ॥ २१ ॥ तारिणीं ॥ मार्कंडेयपुराणप्रसिद्धयामदालसयावासिष्ठरामायणप्रसिद्धयाचूडालयाचतुल्याम् ॥ आद्ययापुत्रस्तारितोद्वितीययापतिरेवतारितइतितत्राख्यानात् ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महास्तोत्रंसप्तशत्याख्यम् अनेनचार्गलास्तुतेरपिसप्तशत्यंगत्वंबोधितम् ॥ यएवमर्गलास्तुतिंपठित्वासप्तशतीस्तोत्रंजपतिसतुसएवसप्तशत्याः संख्यासम्यक्कथनंत यायज्जायमानंवरंफलंतत्प्राप्नोतिनान्यःसंपदश्चप्राप्नोतितस्मादवश्यमर्गलास्तोत्रंपठनीयमितिभावः ॥ सिद्धिप्रतिबंधकंपापमर्गलासदृशत्वादर्गला तन्नाशकस्तो त्रस्यापिलक्षणयार्गलेतिसंज्ञा ॥ २३ ॥ त्रयोविंशतिसंख्यानांश्लोकानामत्रसंग्रहः ॥ अत्रापिमूलंवाराहीतंत्रमेव ॥ इति श्रीशैवोपनामकरंगनाथभट्ट सुतलक्ष्मीगर्भजनीलकंठभट्टकृतमर्गलाविवरणंसमाप्तम् ॥ २॥ अथकीलकविवरणम् ॥ तत्रमार्कंडेयऋषिः शिष्यानुपादिदेश ससंवादस्तंत्रेषुकथितइतितंत्रस्थ मेवैतत् ॥ ऋषिरुवाच ॥ मार्कंडेयऋषिःस्वशिष्यान्प्रतीत्यर्थात् ॥ कीलकंवक्तुंमंगलमाचरतिमार्कंडेयः ॥ विशुद्धेति ॥ निर्मलज्ञानरूपायेत्यर्थः ॥ त्रिवे दीवेदत्रयरूपंदिव्यंचक्षुर्यस्यतस्मैश्रेयःप्राप्तेःकल्याणप्राप्तेर्निमितायसोमार्धधारिणेनमोस्त्वित्यर्थः ॥ अत्रकेचिदयंश्लोकस्तर्कचरणमीमांसावार्तिकप्रथमोत्रापि

इदंस्तोत्रंजपित्वातुमहास्तोत्रंपठेन्नरः ॥ सतुसप्तशतीसंख्यावरमाप्नोतिसंपदः ॥ २३ ॥ इति अर्गलास्तुतिः ॥ २ ॥ ॥ ऋषिरुवाच ॥ विशुद्धज्ञानदेहायत्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्तायनमःसोमार्धधारिणे ॥ १ ॥ सर्वमेतद्विनायस्तुमंत्राणामभिकीलकम् ॥ सोपि क्षेममवाप्नोतिसततंजाप्यतत्परः ॥ २ ॥

बहुभिः पठ्यतेपरंतुअनार्षइत्याहुः ॥ वयंतुब्रूमोत्रत्यएवसश्लोकोमंगलार्थंवार्तिककारैर्गृहीतइतिकुतोनस्यात्नहिकुत्रचित्स्थितःश्लोकोमंगलार्थमन्यत्रन गृहीतव्यइतिराजाज्ञास्ति तस्मात्सर्वपुस्तकेषुउपलंभादार्षएवश्लोकइति ॥ १ ॥ किमुवाचतदाह ॥ सर्वमिति ॥ मंत्राणांसर्वेषामभिकीलकंवक्ष्यमाणरीत्या सर्वमंत्रसिद्धिप्रतिबंधकशापरूपकीलकनाशकत्वाल्लक्षणयासप्तशतीस्तोत्रमभिकीलकंतत्सर्वंविजानीयादुपासीतेत्यर्थः ॥ नन्वन्यमंत्रोपासनाभिः किंक्षेमंन भवतियतोत्रैवाग्रहःक्रियतेइतिचेद्भवत्येवेत्याह ॥ सोपीति॥ तत्सप्तशतीस्तोत्रंविनासततंजाप्यतत्परः नानामंत्राणांजपरूपेकर्मणिनिरंतरंनिष्ठायस्यसः तत्परो यस्तुपुरुषःसोपिक्षेमंसर्वंकल्याणंप्राप्नोतीत्यर्थः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंजपतत्परस्यपुरुषस्योच्चाटनादीन्यपिकर्माणिसिध्यंतितथासकलानिवस्तून्यलभ्यानिसिध्यंति ॥ एवंसप्तशतीपाठरहितानामपिपुरुषाणांकेवलमंत्रजपेन
सिद्धिमुक्त्वामंत्रजपरहितानामपिपुरुषाणांकेवलसप्तशतीपाठेनापिसर्वसिद्धिमुपादिशति ॥ एतेनेति॥ एतेनप्रकृतेनस्तोत्रमात्रेणसप्तशत्याख्यस्तोत्रपाठमात्रेणस्तु
वतांस्तोतॄणांदेवीभगवतीसच्चिदानंदरूपिणीसिद्ध्यातिप्रसीदति ॥ ३ ॥ अस्यपुरुषस्यनान्यमंत्राद्युपयोगइत्याह ॥ नमंत्रइति ॥ तत्रतस्यपुरुषस्यकार्यसिद्धौ
नमंत्रउपयुक्तोभवतितथानौषधंतथानकिंचिदन्यदपियोगसिध्यादिरूपंसाधनंविद्यतेउपयोगाय किंतुजाप्येनविनातत्तन्मंत्रजपरूपकर्माभावेपिसर्वमुच्चाटनादिक
माभिचारिकंकर्मतथासमग्राण्यप्यभिलषणीयानिकार्याणिसिध्यंति ॥ केवलस्तोत्रमात्रेणेति ॥ एतावत्पर्यंतंसप्तशत्युपासनयाकेवलयासर्वंकल्याणंभवति

सिद्ध्यंत्युच्चाटनादीनिवस्तूनिसकलान्यपि ॥ एतेनस्तुवतांदेवीस्तोत्रमंत्रेणसिद्ध्यति ॥ ३ ॥ नमंत्रोनौषधंतत्रनकिंचिदपिविद्यते ॥
विनाजाप्येनसिध्येतसर्वमुच्चाटनादिकम् ॥ ४ ॥ समग्राण्यपिसिद्ध्यंतिलोकशंकामिमांहरः ॥ कृत्वानिमंत्रयामाससर्वमेवमिदंशुभम् ॥
॥ ५ ॥ स्तोत्रंवैचंडिकायास्तुतच्चगुह्यंचकारसः ॥ समाप्तिर्नचपुण्यस्यतांयथावन्नियंत्रणाम् ॥ ६ ॥

तथासप्तशत्यन्यमन्त्रोपासनयापिसर्वंकल्याणंभवतीतिपक्षद्वयमुपपादितम् ॥४॥ इत्थंपक्षद्वयमपीदमस्तीतियापक्षद्वयविषयिणीलोकानांशंकातांहरः प्रथमतः
कृत्वातच्छंकानिरासार्थंनिमंत्रयामासानिमंत्रितवानर्थाल्लोकांस्तानागतानाह किमिति वक्ष्यमाणप्रकारेणेदंसप्तशत्याख्यमेवशुभमिति॥अत्रतानाहेतिशेषः॥५॥
अनंतरंचंडिकायास्तुचंडिकायाएवस्तोत्रंसप्तशत्याख्यंतच्चगुह्यमतिरहस्यंचकार॥पूर्वोक्तमंत्रजपरूपपक्षापेक्षयाद्वितीयंपक्षमेवसारभूतंचकारेत्यर्थः॥इतिमार्कंडे
येनतंत्रोक्तंपूर्ववृत्तंकथितं पुनःशिष्यान्सप्तशतीमाहात्म्यंकथयन् शिवाभिप्रायंकथयति॥यस्मादेतत्स्तोत्रपाठजन्यफलस्यनसमाप्तिःकदापिभवतितत्तन्मंत्रजप
जन्यपुण्यस्यतुसमाप्तिरस्तितस्मात्तांपूर्वोक्तांशिवेनकृतांनियन्त्रणांप्रथमपक्षस्यसंकोचरूपांयथावद्यथार्थमेवजानीध्वमितिशेषः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपीति ॥ सोपितत्तन्मंत्रजपकर्तापिएतत्स्तोत्रजपसहितश्चेदेवसर्वंक्षेममवाप्नोतितस्मात्तंप्रथमपक्षंविहायसप्तशतीपाठेएवसर्वैरादरःकर्त्तव्यइत्यर्थः एतेनान्ये मन्त्राअपिसप्तशतीपाठंकृत्वैवजपनीयाः अन्यथातत्तन्मंत्रफलप्राप्तिर्नस्यादितिबोधितम् ॥ यतएतत्सर्वमन्त्रसिद्धिप्रतिबंधकनाशकंभवति॥तस्मादेवमंत्राणाम भिकीलकमेतदितिपूर्वमुक्तमितिबोध्यम् ॥ अभिकीलकंसिद्धिप्रतिष्टंभकरंदोषरूपंतन्नाशकत्वादस्यापिलक्षणयाअभिकीलकत्वम् ॥ नन्वत्रापिनवार्णमन्त्रज पापेक्षास्त्येवेतिचेत्साशीघ्रफलार्थमितिब्रूमोनतुतद्विनाफलमेतस्यनास्तीति ॥ एतद्विनातुतत्तन्मंत्राणांफलमेवनभवतीतिविशेषः ॥ परंतुहेशिष्याःतत्स्तोत्रंसर्वे षामप्यचिंत्यफलप्रदंजातमितिसर्वेपिसर्वेश्वराभविष्यंतीतिज्ञात्वामहादेवेनकीलितमस्तीत्याह ॥ कृष्णायामिति ॥ कृष्णचतुर्दश्यामष्टम्यांवाकृष्णायांसमाहि तः एकाग्रःसन् ॥ ७ ॥ यउपासकोनिजंसर्वंधनंन्यायेनार्जितंदेव्यैददातिसमर्पयति ॥ हेदेविइतआरभ्येदंसर्वंमदीयंधनंतुभ्यंमयादत्तमस्तिइतिसमर्पयतिपश्चा

सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः ॥ कृष्णायांवाचतुर्दश्यामष्टम्यांवासमाहितः ॥ ७ ॥ ददातिप्रतिगृह्णातिनान्यथैषाप्रसीदति ॥ इत्थं रूपेणकीलेनमहादेवेनकीलितम्॥ ८ ॥ योनिःकीलांविधायैनांनित्यंजपतिसंस्फुटम् ॥ ससिद्धःसगणःसोपिगंधर्वोजायतेवने ॥ ९ ॥

त्संसारयात्रानिर्वाहार्थंगृहाणेदंद्रव्यंमत्प्रसादभूतमितिदेव्याअनुज्ञांमनसागृहीत्वातद्द्रव्यंप्रसादबुद्ध्याप्रतिगृह्णातिगृहीत्वाधर्मशास्त्रोक्तमार्गेणतस्यव्ययंकुर्वन्निरंत रंदेव्यधीनोभवतितस्यैषासप्तशतीप्रसन्नाभवतिनान्यथा इत्थंरूपेणकीलेनसिद्धिप्रतिष्टंभकरेणरूपेणमहादेवेनकीलितमास्ते ॥ अयंचकीलकस्यार्थोरहस्याम्ना येगुरुकीलकपटलेप्रदर्शितः ॥ अग्रेस्पष्टीकरिष्यामः ॥ ८ ॥ तर्हिकिंकर्तव्यंतत्राह ॥ यइति ॥ यस्मादेवंतस्माद्योहिपुरुषएतांसप्तशतींपूर्वोक्तदानप्रति ग्रहकरणेननिकीलांविधायस्फुटंयथास्यात्तथासंजपतिसएवसिद्धोभवतिसएवदेव्यागणोभवतिसोपिसएवावनेसर्वजगद्रक्षणेगंधर्वः ॥ बृहदारण्यके तस्यासीद्बुहि तागंधर्वगृहीतेतिश्रुत्युक्तोदेवताविशेषोगंधर्वोजायतेसहिसमर्थःसर्वजगद्रक्षणेइति ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टफलान्याह ॥ नेति ॥ १० ॥ एतादृशंकीलकमज्ञात्वापाठकर्तुर्दोषमाह ॥ ज्ञात्वेति ॥ पूर्वोक्तंकीलकंज्ञात्वातत्परिहारंप्रारभ्यपाठंकुर्वीततत्परिहारमकुर्वाणो विनश्यति ॥ यस्मादेवंतस्मात्कीलकं ज्ञात्वैवसंपन्नंनिर्दुष्टमिदंस्तोत्रंबुधैः प्रारभ्यते ॥ अत्रविनाशकथनंकीलकज्ञानस्यावश्यकत्वार्थमेव ॥ यथाकथंचित्पाठस्यापिवचनांतरैरनुज्ञानात् ॥ ११ ॥ तेनतेनहेतुनाजाप्यमित्यर्थः ॥ १२ ॥ शनैस्त्विति ॥ शनैः स्वकर्णागोचरंयथास्यात्तथापाठेयत्किंचित्संपत्तिरेवभवति ॥ उच्चकैः उच्चैः पाठेतुसमग्रापिभवत्येव ॥ ततउच्चकैरेवैतत्प्रारभ्यमित्यर्थः ॥ १३ ॥ इत्थंमुनिः कीलकविधिंसमाप्यजनानाक्रोशति ॥ ऐश्वर्यमिति ॥ परोमोक्षः कैवल्यमोक्षः अहोमंदभाग्याएतेदृष्टिगोचरं चिंतामणिंकामदुघांभगवतींविहायस्वकल्याणार्थंवराटिकाम

नचैवाप्यटतस्तस्यभयंक्वापीहजायते ॥ नाल्पमृत्युवशंयातिमृतोवामोक्षमाप्नुयात् ॥१०॥ ज्ञात्वाप्रारभ्यकुर्वीतह्यकुर्वाणोविनश्यति ॥ ततोज्ञात्वैवसंपन्नमिदंप्रारभ्यतेबुधैः ॥ ११ ॥ सौभाग्यादिचयत्किंचिद्दृश्यतेललनाजने ॥ तत्सर्वंतत्प्रसादेनतेनजाप्यमिदंशुभम् ॥ १२ ॥ शनैस्तुजाप्यमानेस्मिन्स्तोत्रेसंपत्तिरुच्चकैः॥भवत्येवसमग्रापिततःप्रारभ्यमेवतत् ॥१३॥ऐश्वर्ययत्प्रसादेनसौभाग्यारोग्यसंपदः॥ शत्रुहानिःपरोमोक्षःस्तूयतेसानकिंजनैः ॥ १४ ॥ ॥ इति कीलकम् ॥३॥

न्यदेवतोपासनारूपांकिमर्थंगृह्णंतीति ॥ १४ ॥ श्लोकाश्चतुर्दशैवात्रकीलकेसंप्रतिष्ठिताः ॥ अत्रापिमूलंवाराहीतंत्रंस्पष्टंचेदंगुप्तवत्याम् ॥ अत्ररहस्यंतंत्रस्थोगुरुकीलकपटलोलिख्यते ॥ शिवउवाच ॥ पुरासनत्कुमारायदत्तमेतन्मयानघ ॥ संवर्तायददौतच्चसचान्यस्मैददौचतत् ॥ १ ॥ सर्वत्रचंडीपाठस्यप्राचुर्येणमहीतले ॥ ब्रह्मकांडः कर्मकांडस्तंत्रकांडश्चसर्वथा ॥२॥ अभूत्प्रतिहतोनेनशीघ्रसिद्धिप्रदायिनी ॥ तदातेषांचसार्थक्यंकर्तुकामेनभूतले॥ ३॥दानप्रतिग्रहत्वेनमंत्रोयंकीलितोमया ॥ दानप्रतिग्रहाख्यंयत्कीलंकसमुदाहृतम् ॥४॥ तदारभ्यचमंत्रोयंकीलकेनाभिकीलितः ॥ नसर्वेषांभवेत्सिद्धयेकीलकपरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङ्मुखाः ॥ ५ ॥ येनराः कीलनेनेमंजपंतिपरयामुदा ॥ तेषांदेवीप्रसन्नास्याच्चतः सर्वाःसमृद्धयः॥६॥त्वत्प्रसूतस्त्वदाज्ञप्तस्त्वद्दासस्त्वत्परायणः ॥ त्वन्ना
मचिंतनपरस्त्वदर्थेऽहंनियोजितः ॥ ७ ॥ मयार्जितमिदंसर्वंतवस्वंपरमेश्वरि ॥ राष्ट्रंबलंकोशगृहंसैन्यमन्यच्चसाधनम् ॥८॥ त्वदधीनंकरिष्यामियत्रार्थेत्वंनि
योक्ष्यसि ॥ तत्रदेविसदावर्तेत्वदाज्ञामेवपालयन् ॥ ९ ॥ इतिसंचित्यमनसास्वार्जितानिधनानिच ॥ कृष्णायांवाचतुर्दश्यामष्टम्यांवासमाहितः ॥ १० ॥
समर्पयेन्महादेव्यैस्वार्जितंसकलंधनम् ॥ राष्ट्रंगृहंकोशबलंनवंचयदुपार्जितम् ॥ ११ ॥ अस्मिन्मासिमयादेवितुभ्यमेतत्समर्पितम् ॥ इतिध्यात्वाततोदे
व्याः प्रसादात्प्रतिगृह्यच ॥ १२ ॥ विभज्यपंचधासर्वंत्र्यंशान्स्वार्थंप्रकल्पयेत् ॥ देवपित्रतिथीनांचक्रियार्थंत्वेकमादिशेत् ॥ १३ ॥ एकांशंगुरवेदद्या
त्तेनदेवीप्रसीदति ॥ तस्यराज्यंस्वकंसैन्यंकोशः साधुविवर्धते ॥ १४ ॥ नानारत्नाकरःश्रीमान्यथापर्वणिवारिधिः ॥ ज्ञात्वानवाक्षरंमंत्रंजीवब्रह्मसमाश्रयम्
॥ १५ ॥ तत्त्वमस्यादिवाक्यानांसारंसंसारभेषजम् ॥ सप्तशत्याख्यमंत्रस्ययावज्जीवमहंजपम् ॥ १६ ॥ कुर्वंस्ततोनप्रमादंप्राप्नुयामितिनिश्चितम् ॥
कृत्वाप्रारभ्यकुर्वीतह्यकुर्वाणोविनश्यति ॥ १७ ॥ नाहंब्रह्मनिराकुर्यांमामांब्रह्मनिराकरोत् ॥ अनिराकरणंमेस्तुअनिराकरणंमम ॥ १८ ॥ इतिवेदांतमू
र्धन्येछांदोग्येस्यप्रपंचनात् ॥ प्रारभ्यतत्परित्यागोनतस्यश्रेयसेततः ॥ १९ ॥ नाब्रह्मवित्कुलेतस्यजायतेहिकदाचन ॥ नदारिद्र्यंकुलेतस्ययावत्स्थास्य
तिमेदिनी ॥ २० ॥ प्रतिसंवत्सरंकुर्याच्छारदंवार्षिकंतथा ॥ तेनसर्वमवाप्नोतिसुरासुरसुदुर्लभम् ॥२१॥ अन्यच्चयद्यत्कल्याणंजायेततत्क्षणेक्षणे ॥ स
त्यंसत्यमिदंसत्यंगोपनीयंप्रत्नतः ॥ २२ ॥ पुत्रायब्रह्मनिष्ठायपित्रादेयंमहात्मना ॥ अन्यथादेवतातस्मैशापंदद्यान्नसंशयः॥२३॥ इति॥अयंभावः ॥ पित्रा
र्जितंविनास्वेनैवमंत्रप्राप्त्युत्तरंयद्यन्नूतनमर्जितंतदर्जनंमाससंबंधिकृष्णचतुर्दश्यष्टमम्यन्यतरदिवसेदेवीनिकटेस्थित्वादेशकालौसंकीर्त्यदानप्रतिग्रहाख्येनकर्मणा
देवींप्रीणयिष्येइतिसंकल्प्यत्वत्प्रसूतइत्यादिश्लोकत्रयमर्थानुसंधानपूर्वकंपठित्वाराष्ट्रंबलंकोशगृहंइतिश्लोकमंत्रेणदेवीचरणयोर्दत्तमिवानुसंधायप्रसन्नयादेव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञतएवपुनः प्रतिग्रहंविभाव्यतन्मध्येपंचमंभागंगुरवेनिवेद्यतत्पुत्रादिभ्योवादत्त्वावशिष्टंचतुर्थांशंस्वेनक्रियमाणपंचयज्ञादिधर्मव्ययार्थंनिष्कास्येतरत्स्वार्थंयथेष्टं नियोजयेत् ॥ अत्रमासश्चांद्रमासोग्राह्यः ॥ अमायामार्जितस्यतूत्तरमासेदानंमंत्रपूर्वमासीदित्यूहोयथान्यायंतंत्रेणदानादावूह्यः ॥ प्रकृतेतदपवादमाह ॥ ज्ञात्वेतिपंचदशश्लोके॥ नवार्णमंत्रंस्वीकृत्यमहावाक्यार्थसंवादिनंतदर्थंचगुरोर्लब्ध्वाधिकृतः सन्नद्यावधियावज्जीवंसप्तशतीस्तवपाठंप्रमादेनसकृदपिनत्यक्ष्येइति दृढंसंकल्प्यतथैवानुतिष्ठेत् ॥ अनेनचकीलकपटलेनददातिप्रतिगृह्णातीत्यस्यज्ञात्वाप्रारभ्यकुर्वीतेत्यस्यचप्रागुक्तोर्थःस्पष्टमेवोक्तइति॥ इतिश्रीशैवोपनामकरंग नाथभट्टसुतलक्ष्मीगर्भजनीलकंठभट्टकृतंसप्तशतीकीलकविवरणंसमाप्तम्॥ ३॥ अथरहस्यव्याख्या॥ तत्रसुमेधसंप्रतिसुरथोराजाप्रश्नंकरोति ॥ भगवन्निति ॥ हेभगवन् ॥ यद्भयाद्वातिवातोयंसूर्योभीत्याचगच्छति ॥ इंद्राग्निमृत्यवस्तद्वत्सादेवीचंडिकास्मृतेतिभुवनेश्वरसंहितोक्तेः ॥ चंडभानुः चंडवातइत्यादौ

राजोवाच ॥ भगवन्नवतारामेचंडिकायास्त्वयोदिताः ॥ एतेषांप्रकृतिंब्रह्मन्प्रधानंवक्तुमर्हसि ॥ १ ॥

भयजनकेचंडपदस्यप्रयोगाच्च भयजनककोपार्थकचडिकोपेइतिधातोः पचाद्यचिगौरादिपाठात्ङीषिकृतेचंडीतिरूपंभवति ॥ तद्वशादेवनमस्तेरुद्रमन्यवइत्या दिनाप्रथमंमन्यवेएवनमस्कारदर्शनम् ॥ भीषास्माद्वातःपवते भीषोदेतिसूर्यःभीषास्मादग्निश्चेन्द्रश्चमृत्युर्धावतिपंचमइत्यादिश्रुत्यावाय्वादिभयजनककोपस्या पिपरब्रह्मलिंगत्वमक्षतमेव ॥ अतएवमहद्भयंवज्रमुद्यतमितिश्रुतौवज्रपदेनात्रब्रह्मैवोच्यते नायुधविशेषोभयजनकत्वलिंगादित्युत्तरमीमांसायांकंपनादित्यधि करणे॥ तस्मात्सर्वभयजनकंसर्वप्रशास्तृपरंब्रह्मैवचंडीपदवाच्यम् ॥ तस्याश्चिद्रूपायाश्चंडिकायाअवतारास्त्वयामेमह्यंकथिताः ॥ परंतुएतेषामवताराणां प्रकृतिंमूलभूतांप्रधानांमुख्यांहेब्रह्मन्वक्तुमर्हसि यन्मुख्यरूपपूजयामूलसेकेनशाखानांसेचनवद वताराणामपिपूजाभविष्यतितन्मुख्यंरूपंकथयेतिभावः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाह आराध्यमिति ॥ येनचविधिनातद्रूपमाराध्यंतंविधिंतदाराध्यंचरूपंवदेत्यर्थः ॥ किमितिचेत्प्रणतस्यमेसंबंधसामान्येषष्ठी ॥ प्रणतंशिष्यंमांब्रूहीत्यर्थः ॥ भक्तियुक्तायशिष्याययथावद्गुरुणासर्वंवक्तव्यमितिभावः ॥ २ ॥ राजवाक्यंश्रुत्वाऋषिरुवाच ॥ हेराजन्यत्त्वयादृष्टंतादिदंपरममुत्कृष्टंरहस्यमस्ति अतएवैतदनाख्येयंकस्याप्यकथनीयमितिप्रचक्षते ॥ महांतः शिवादयः ॥ तथाचतंत्रेषु ॥ एतत्प्रकाशनंमातुरुद्घाटनमुरोजयोः ॥ तस्मान्नैवप्रकाशोस्यकर्तव्यः परमेश्वरीति ॥ सर्वथाप्रकाशनिषेध उक्तः ॥ तथापि तत्रैवनाभक्तायप्रदातव्यंनाशिष्यायकथंचनेत्युक्तेः ॥ शिष्यस्यानुमतिदर्शनात् ॥ हेनराधिपत्वंभक्तोसिइतितवावाच्यंनैवकिंचिदस्तियत्पृच्छ्यतेतत्सावधानतः शृणु ॥ ३ ॥ तत्रसर्वदेवतानांरूपद्वयंसूक्ष्मंस्थूलंचेति ॥ सूक्ष्मंतत्तदुपाधिविशिष्टचै

आराध्यंयन्मयादेव्याःस्वरूपंयेनचद्विज ॥ विधिनाब्रूहिसकलंयथावत्प्रणतस्यमे ॥२॥ ॥ ऋषिरुवाच ॥ ॥ इदंरहस्यंपरममनाख्येयंप्रचक्षते ॥ भक्तोसीतिनमेकिंचित्तवावाच्यंनराधिप ॥ ३ ॥ सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपासाव्याप्यकृत्स्नंव्यवस्थिता ॥ ४ ॥

तन्यरूपंमंत्रवाच्यम् ॥ स्थूलंतुतत्तत्सूक्ष्मरूपोपासकभक्तानुग्रहार्थंतेनैवसूक्ष्मरूपेणस्वीकृतंकरचरणादिविशिष्टंतंत्रविदांस्पष्टमेतत् ॥ तदुभयंदर्शयति ॥ सर्वस्येति॥सर्वस्यकार्यप्रपंचस्यसर्वस्यावतारसमूहस्यचाद्याप्रथमामहालक्ष्मीर्भवति ॥ रूपमाह ॥ त्रिगुणेति ॥ त्रयोगुणाः सत्वरजस्तमोरूपाः साम्यावस्थापन्नायस्याःसा अतएवप्रपंचस्योद्भूतगुणस्यकारणत्वात्परमेश्वरीपरमेशित्री ॥ किंजडा नेत्याह॥ लक्ष्येति ॥ लक्ष्यंलक्षणीयंमायारूपमलक्ष्यंब्रह्मरूपंतदुभयस्वरूपा त्रिगुणमायाशबलब्रह्मरूपेत्यर्थः ॥ साक्वर्तते॥तत्राह॥ व्याप्येति ॥ कृत्स्नंजगद्व्याप्यस्थितास्ति नहिघटादिकार्यंमृत्कारणाननुविद्धंक्वचिद्दृश्यतेतथेदमपिजगत्कार्यंसच्चिदानंदमायाशबलब्रह्माननुविद्धंनक्वचिद्भासते ॥ तदुक्तम्॥अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकम् ॥ आद्यंत्रयंब्रह्मरूपंमायारूपंततोद्वयमिति॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसूक्ष्मंरूपसर्वकारणमुक्त्वावताराणामपिमूलभूतंप्रधानमवतारंस्थूलरूपात्मकंदर्शयति ॥ मातुलिंगमिति ॥ मातुलिंगंबीजपूराख्यंफलं गदाप्रसिद्धा खेटंचर्म पानपात्रंचप्रसिद्धम् ॥ आयुधक्रमस्तुसह्याद्रिखंडेरेणुकामाहात्म्ये ॥ दक्षिणेधःकरेपात्रमूर्ध्वेकौमोदकींतथा ॥ वामेथखेटकंधत्तेश्रीफलंतदधःकरे ॥ बिभ्रतीम स्तकेलिंगंपूजनीयाविभूतयेइति ॥ आयुधार्थस्तुभुवनेश्वरीसंहितायामुक्तः ॥ मातुलिंगंकर्मवृंदंक्रियाशक्त्यात्मिकागदा ॥ ज्ञानशक्त्यात्मकंखेटंतुर्यवृत्तिस्तु पानकम् ॥ लिंगंपुरुषइत्युक्तोयोनिस्तुप्रकृतिःस्मृता ॥ नागःकालः समाख्यातः संबंधस्तुतयोर्द्वयोः ॥ त्रयाणामप्यधिष्ठानंयतः स्यात्परमेश्वरी ॥ नवार्णमं त्रमध्यस्थमायाबीजस्वरूपिणीति ॥ तथाचमातुलिंगग्रहणेनसर्वकर्मणांफलदात्र्यहमस्मीतिबोध्यते ॥ गदाधारणेनक्रियास्वरूपाविक्षेपशक्तिर्मय्यस्तीतिबोधि तम् ॥ खेटधारणेनज्ञानशक्तिसद्भावदर्शनेनावरणाभावोबोधितः ॥ पानपात्रेणनिरंतरमहंस्वानंदानुभवरसंपिबामीतिबोधितम् ॥ द्वयोः प्रकृतिपुरुषयोः सं

मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती ॥ नागंलिंगंचयोनिंचबिभ्रतीनृपमूर्धनि ॥५॥ तप्तकांचनवर्णाभातप्तकांचनभूषणा ॥ शून्यंतदखिलं स्वेनपूरयामासतेजसा ॥ ६ ॥

बंधात्मकोहिकालः तथाचतेषांधारणेनतेषांप्रकृ तिपुरुषकालानामधिष्ठानब्रह्मरूपिण्यहमस्मीतिदेव्याबोधितम् ॥ नवार्णमंत्रस्यमध्यस्थंयन्मायाबीजंतदस्यामंत्रोस्तीतिपूर्ववचनेनायमर्थोबोधितः ॥ इयमेव भुवनेश्वरीतितंत्रेषुघंटाघोषः॥भुवनेश्वरीमहालक्ष्म्योः सूक्ष्मरूपैकत्वेपिमायाबीजरूपमंत्रैकत्वेपिस्थूलरूपेणपाशांकुशाभयवरायुधात्मकेनमातुलिंगगदाखेटपान पात्रायुधात्मकत्वेनभेदात् ॥ ध्यानभेदेनैवभेदव्यवहारोनतत्त्वतोमंतव्यः॥सर्वंचेदंतंत्रविदांस्पष्टम् ॥५॥अथमहालक्ष्म्यावर्णालंकारानाह॥तप्तकांचनेति॥ रक्त वर्णेत्यर्थः॥शून्यमिति॥शून्यंस्वतःसत्ताशून्यंजगत्स्वतेजसास्वसत्तयापूरयामासपूरितवती॥ यद्वा स्वतेजसास्वप्रतिबिंबचिदाभासेनशून्यंजगत्तेनपूरितवतीत्य र्थः॥अत्रेदंबोध्यम् ॥नियतकालपरिपाकानांहिप्राणिकर्मणांमध्येपरिपक्वानामुपभोगेनक्षयादितरेषांचापरिपक्वानांभोगसंभवेनतदर्थायाः सृष्टेरनुपयोगाद्धिरण्यग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वमेकीकृत्यसुषुप्तावस्थांप्रलयात्मकांगतोभवति ॥ मायोदरेतदागर्भिणीगर्भवत्सर्वप्रपंचरूपमंडंतिष्ठतितदाग्रस्तसमस्तप्रपंचामायास्वनिष्ठेनिर्गुणेब्रह्मणिवि
लीनासतीयावदवशिष्टकर्मपरिपाकंतथैवतिष्ठति ॥ तदुक्तंविष्णुपुराणे ॥ जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सुप्रलीयते ॥ तेजःस्वापःप्रलीयंतेतेजोवायौप्रलीयते ॥
वायुःप्रलीयतेव्योम्नितदव्यक्तेप्रलीयते ॥ अव्यक्तंपुरुषेब्रह्मन्निष्कलेसंप्रलीयते॥इति ॥ अव्यक्तंमाया ॥ अव्यक्तंप्रकृतिर्मायेतिवायुपुराणात् । अवशिष्टैःप्रा
णिकर्मभिश्चतस्यांमायायांविलीयैवक्रमेणप्राप्तपरिपाकैः परमेश्वर्याभगवत्याश्चिदात्मिकायाः सिसृक्षात्मिकामायावृत्तिरुत्पद्यतेसैषामायावस्थाईक्षणकामतपो
विचिकीर्षादिशब्दैरभिधीयते ॥ तदैक्षतबहुस्यांप्रजायेयेतिच्छांदोग्ये ॥ सऐक्षतलोकानुत्सृजाइत्यैतरेयके॥सोकामयतबहुस्यांप्रजायेयेतितैत्तिरीये ॥ तपसा
चीयतेब्रह्मेतिमुंडके॥ विचिकीर्षुर्घनीभूतीकचिदभ्येतिबिंदुतामितिप्रपंचसारे॥प्रलयेसृज्यमानप्राणिकर्मणामपरिपाकदशायांतादृशकर्माभिन्नमायावच्छिन्नंब्रह्म
घनीभूतमित्युच्यते ॥ कालवशात्कर्मणांपरिपाकेसतिविश्वदेवस्थः परिपाकप्रागभावोविचिकीर्षेत्युच्यते॥ ततः परिपाकक्षणेमायावृत्तिरुत्पद्यतेतादृशंपरिवक्र
कर्माकारपरिणतमायाविशिष्टब्रह्मबिंदुस्तदिदमविभागावस्थमव्यक्तमव्याकृतमित्युच्यते ॥ अतएवतस्योत्पत्तिःश्रूयते ॥ तस्मादव्यक्तमुत्पन्नांत्रिगुणंद्विजसत्त
मेति ॥ मायायाअनुत्पन्नत्वेपितादृशाकारेणोत्पन्नत्वादुत्पन्नेतिव्यवहारः ॥ तस्यचव्यक्तस्यब्रह्मणः अव्याकृताव्यक्तमायाशक्तिकारणबीजत्रिगुणापरामहा
प्रकृतिभुवनेश्वरीत्यादयः संज्ञाःतन्मं त्रस्यमायाबीजस्याप्येताएवसंज्ञास्तंत्रेषुप्रसिद्धाः ॥ इतरमंत्रापेक्षयामायाबीजेप्रत्यासत्त्यतिशयान्मायाबीजमेवमुख्यत्वे
नैतत्तस्यवाचकम् ॥ अतएवमायाबीजस्यदेवीप्रणवशक्तिप्रणवशक्तिप्रणवशक्तिबीजपराबीजात्रिगुणामायापराशक्तीत्यादिसामान्यशब्दैर्व्यवहारस्तंत्रेषु ॥
प्रणवोप्यस्यैवतत्त्वस्यवाचकः ॥ तदुक्तमाचार्यैःशंकरभगवत्पादैःप्रपंचसारेप्रथमपटलेमायास्वरूपनिरूपणानंतरम्॥ तदातांतारमित्याहुरोमात्मेतिबहुश्रुताः॥
तामेवशक्तिंब्रुवतेहरेरात्मेतिचापरेइति ॥ तदेतदव्याकृतंद्विविधमंतर्मुखंबहिर्मुखचेति ॥ तत्रअंतर्मुखस्यतुरीयमितिसंज्ञा ॥ बहिर्मुखस्यकारणदेहइतिसंज्ञा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमौचद्वौभेदौतापनीयेप्रसिद्धौ ॥ तत्रबहिर्मुखात्तत्त्वादात्मनआकाशःसंभूतइत्यादिक्रमेणसूक्ष्मदेहस्थूलदेहयोरुत्पत्तिःसर्ववेदांतप्रसिद्धा तथाचतुरीयाकारेणसूक्ष्मस्थूलमध्येएवसर्वप्रपञ्चस्यांतर्भावः ॥ तत्रथूलदेहस्यसमष्टिव्यष्ट्यात्मकस्यलिंगदेहस्यज्ञानेंद्रियांतःकरणरूपस्यचाधिपतिःसरस्वतीसहितोब्रह्माक्रियाशक्त्यात्मकप्राणात्मलिंगदेहस्याधिपतिर्लक्ष्मीसहितोविष्णुः कारणदेहस्याभिमानीगौरीसहितोरुद्रस्तुरीयदेहस्यभुवनेश्वरीमहालक्ष्मीअभिमानिन्यौदेवते इतिवस्तुस्थितिःसकलवेदतंत्रपुराणसिद्धा ॥ इदंसर्वंमत्कृतदेवीभागवतटीकायांस्पष्टम् ॥ ६ ॥ तत्रतुरीयरूपाधिष्ठात्र्यामहालक्ष्म्याः सर्वावतारमूलभूतायाः स्वरूपमभिहितं संप्रत्यवतारांतरस्यस्वरूपमाह ॥ शून्यमिति ॥ अधिष्ठातृभिःशून्यंसकलंलोकंविलोक्य केवलेनतमसागुणेनोपाधिनापरंरूपंरूपांतरंबभा

शून्यंतदखिलंलोकंविलोक्यपरमेश्वरी ॥ बभाररूपंपरमंतमसाकेवलेनहि ॥ ७ ॥ साभिन्नांजनसंकाशादंष्ट्रांकितवरानना ॥ विशाललोचनानारीबभूवतनुमध्यमा ॥ ८ ॥

रधारितवतीत्यर्थः॥अयंभावः॥मायाशबलब्रह्मणः सद्रूपत्वंचिद्रूपत्वमानंदरूपत्वंचास्तिगुणत्रयसाम्यावस्थात्मकत्वंच तत्रप्राणिकर्मवशादद्धागुणद्वयापेक्षया तमोगुणः किंचित्स्वस्थानाच्चलितइवजातस्तदातेनकेवलेनचलिततमोगुणेनविशिष्टंयत्तदेवाव्यक्तंतत्तमोगुणाभिमानत्वेनमहाकाल्याख्यंरूपंधारितवदित्यर्थः॥ महालक्ष्मीतुसाम्यावस्थाभिमानिनीतिपूर्वमेवस्थितम् ॥ ७ ॥ तस्याध्यानमाह ॥ सेति ॥ साकालीभिन्नामूलदेवीतःपृथग्भूता ॥ अभिन्नेतिवाछेदः तयोरभेदात् ॥ यद्वा ॥ भिन्नंस्फुटितंयदंजनमतिनीलंतत्संकाशाउपरिगतमलापगममेध्यभागस्यनीलत्वात् ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पात्रंपानपात्रंपूर्वोक्तार्थकंशिरोमुंडंदक्षिणाकालिकाध्यानेतस्यैवसत्त्वात् ॥ केचित्तु ॥ शिरःशब्देनदंडारोपितग्रीवाभागंखट्वांगनामकमाहुः ॥ कबंधाःशिरोहीनदेहास्तेषांहारंमालामुरसेतिशेषः ॥ हीतिनिश्चयेनशिरसाशिरःस्रजंशिरोमालांदधती ॥ उरसिकबंधमालांशिरसिशिरोमालांदधतीत्यर्थः ॥ केचित्तुकबंधहारशब्देनमुंडमालामहिशिरस्रजमित्यनेनसर्पमस्तकमालामित्यर्थः ॥ मूर्ध्नि सर्पसहस्राणांस्रजंवैसुन्दरीतदेतियामलोक्तेरित्याहुः॥ कबंधहारमुरसेत्यपिपाठःक्वचित् ॥ तदाशिरसेत्यध्याहारः ॥ ९ ॥ सेतिसैवमुत्पन्नामहाकालीतामसीतमोगुणेननिर्वृतापिप्रमदोत्तमासर्वस्त्रीसमुदायेउत्तमालज्जावती तमःकार्येणांतरस्पृष्टे

खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ कबंधहारंशिरसाबिभ्राणाहिशिरःस्रजम् ॥९॥ साप्रोवाचमहालक्ष्मींतामसीप्रमदोत्तमा ॥ नामकर्मचमेमातर्देहितुभ्यंनमोनमः ॥१०॥ तांप्रोवाचमहालक्ष्मीस्तामसींप्रमदोत्तमाम्॥ ददामितवनामानियानिकर्माणितानिते ॥११॥ महामायामहाकालीमहामारीक्षुधातृषा ॥ निद्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया ॥ १२ ॥

वास्तीतिध्वनितम् ॥ महालक्ष्मींप्रोवाचेत्यनेनापि

स्वामिमर्यादापरिपालनप्रकटीकरणेनास्पृष्टतमोगुणदोषेतिध्वनितम् ॥ इच्छयास्वीकृततमोगुणवत्त्वेनतदधीनत्वात् ॥ १० ॥ यानीति ॥ यानियादृशानित्वयाकर्तव्यानिकर्माणिममाभिलषितानितादृशार्थवंतीनिनामानितेतुभ्यंददामि ॥ नामार्थानुरूपमेवकर्मकुर्वित्यर्थः ॥ अनेनैवकर्मोपदेशकरणेनकर्मदेहीतिप्रश्नस्योत्तरमपिदत्तमेवभवतीतिबोध्यम् ॥ यथाश्रुतेतुकर्मदेहीतिप्रार्थनोत्तरंकर्मस्वरूपाकथनेनतस्याअद्यापिकर्माभावाद्यानिकर्माणिइतिअनुपपन्नमेवस्यादितिबोध्यम् ११ महामायेति ॥ ब्रह्मादीनामपिमोहकत्वात्तेषामेवकलनान्मारणाच्चमहामायादिनामत्रयम् ॥ क्षुधातृषेत्यत्रार्शआद्यजंताट्टाप् ॥ सर्वाविद्यादिभक्षणेच्छावतीत्यर्थः ॥ तथासर्वाविद्यादिपानेच्छावतीत्यर्थः ॥ निद्रायोगनिद्रासमाधिस्तद्रूपातदधिष्ठात्रीत्यर्थः ॥ योगनिद्राहरेरुक्तेतिवक्ष्यमाणत्वाच्चतदधिष्ठातृत्वादेवतद्रूपत्वमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुदेवीभागवतेप्रसिद्धम् ॥ तृष्णाभक्तकृतभक्तीच्छावतीत्यर्थः ॥ अर्शआद्यजंतम् ॥ एकवीराबाहुलकादेतद्रूपंसिध्यति ॥ एकैववीरापराक्रमविशिष्टा प्रपंचमध्येइत्येकवीरा ॥ कालनाशकत्वात् कालरात्रिः ॥ यस्याध्वंसाभावः सादुरत्यया ॥ इदंसर्वतमोगुणकार्यकारित्वस्योपलक्षणं तमोगुणवत्त्वादेवकृष्ण वर्णत्वमेवमुत्तरत्रापि ॥ १२ ॥ ईदृशार्थज्ञानपुरःसरंनामसंकीर्तनंफलायविधत्ते ॥ १३ ॥ १४ ॥ १५ ॥ महाविद्येति ॥ महाविद्यादिवागंतानामधिष्ठातृत्वादेवत त्तन्नामत्वम् ॥ अन्यानिनामानिप्रसिद्धार्थकत्वान्येव ॥ अत्रापिनामानुरूपमेवकर्मापिसरस्वत्याज्ञेयमनुक्तमपिपूर्ववत् ॥ ननुयथागुणत्रयोपाधिकस्यब्र ह्मणोभिमानिरूपद्वयमुक्तं तथारजोगुणोपाधिकस्याभिमानीरूपांतरंवक्तव्यमितिचेन्न ॥ गुणत्रयसाम्यावस्थाभिमानिमहालक्ष्मीरूपस्यैवरजोगुणाभिमानित्व

इमानितवनामानिप्रतिपाद्यानिकर्मभिः ॥ एभिःकर्माणितेज्ञात्वायोधीतेसोश्रुतेसुखम् ॥१३॥ तामित्युक्त्वामहालक्ष्मीस्वरूपमपरंनृप॥
सत्त्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंददौ ॥१४॥ अक्षमालांकुशधरावीणापुस्तकधारिणी ॥ साबभूववरानारीनामान्यस्यैवसाददौ ॥ १५ ॥
महाविद्यामहावाणीभारतीवाक्सरस्वती ॥ आर्याब्राह्मीकामधेनुर्वेदगर्भाचधीश्वरी ॥ १६ ॥

स्यापिसंभवेनतद्वक्तव्यत्वानुपयोगात् ॥ नह्येकंरूपमेकस्यैवाभिमानीतिनियमेनप्रमाणमस्तिनियमेवाभगवतीच्छायाः सर्वतोबलवत्त्वान्नरूपांतरेच्छाभगवत्या इतिनरूपांतरंस्वीकृतं किंतुगुणत्रयसाम्यावस्थाभिमानिस्वस्वरूपस्यैव रजोगुणाभिमानित्वमपिस्वीकृतमिति ॥ अतएवमहालक्ष्म्यामूलभूतायारजोगुणाभिमानित्वेनरक्तवर्णत्वम् ॥ अतएवदेवीभागवतेप्रथमस्कंधे ॥ तस्यास्तुसात्विकीशक्तीराजसीतामसीतथा ॥ महाकालीमहालक्ष्मीर्महासरस्वतीतिताःस्त्रियः ॥ इतिमूर्तित्रयमध्येमहालक्ष्म्यागणनंकृत्वायस्याएतास्त्रिविधाःशक्तयस्तस्यामहालक्ष्म्याएवमहताप्रबंधेनवर्णनंकृतम् ॥ तृतीयस्कंधेतच्चोभयोरेक्यएवसंगच्छते ॥ एताश्चतस्रःशक्तयःपतिरहिताः स्वतंत्राविषयवासनारहिताःकेवलंस्वानंदानुभवेनैवानंदिताःसंतीतिभुवनेश्वरीसंहितायाम् ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंतरकृत्यमाह ॥ अथेति ॥ हेदेव्यौस्वानुरूपतःस्वस्वगुणानुरूपेणमिथुनेयुवांजनयतमुत्पादयतमित्यर्थः ॥ जनयतामित्यपिपाठः ॥ १७ ॥ महालक्ष्मीस्तेदे
व्यावुक्त्वाप्रथमतः स्वयमेवमिथुनंससर्जउत्पादितवती पूर्ववत्स्वस्यापिगुणत्रयमूर्तिमध्यस्थत्वाद्धिरण्यगर्भौहिरण्यवन्निर्मलंज्ञानंहिरण्यंतद्गर्भेययोः एकः पुरुषः
अन्यास्त्रीउभावपिकमलासनौ ॥ १८ ॥ अनंतरंदेवीतयोःनामकरणमकरोदित्याह ॥ ब्रह्मन्निति ॥ १९ ॥ मातुराज्ञयातदनंतरंमहाकालीमहासरस्वतीदेव्या
वपिमिथुनद्वयमुत्पादितवत्यावित्याह ॥ महाकालीति ॥ २० ॥ सितांश्वेताम् ॥ अतएवमहाकाल्यामंतर्हितसत्त्वगुणोप्यस्तीतिबोध्यम् ॥ २१ ॥ तत्सृष्टपुरुषना

अथोवाचमहालक्ष्मीर्महाकालींसरस्वतीम् ॥ युवांजनयतंदेव्यौमिथुनेस्वानुरूपतः ॥१७॥ इत्युक्त्वातेमहालक्ष्मीःससर्जमिथुनंस्वयम् ॥
हिरण्यगर्भौरुचिरौस्त्रीपुंसौकमलासनौ ॥ १८ ॥ ब्रह्मन्विधेविरिंचेतिधातरित्याहतंनरम् ॥ श्रीःपद्मेकमलेलक्ष्मीत्याहमातास्त्रियंचताम्
॥१९॥ महाकालीभारतीचमिथुनेसृजतःसह॥एतयोरपिरूपाणिनामानिचवदामिते॥२०॥ नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरम् ॥ जनया
मासपुरुषं महाकालीसितांस्त्रियम् ॥२१॥ सरुद्रःशंकरःस्थाणुःकपर्दीचत्रिलोचनः ॥ त्रयीविद्याकामधेनुःसास्त्रीभाषास्वराक्षरा ॥२२॥
सरस्वतीस्त्रियंगौरींकृष्णंचपुरुषंनृप ॥ जनयामासनामानितयोरपिवदामिते ॥२३॥ विष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्दनः ॥ उमागौ
रीसतीचंडीसुंदरीसुभगाशिवा ॥ २४ ॥ एवंयुवतयःसद्यःपुरुषत्वंप्रपेदिरे ॥ चक्षुष्मंतोनुपश्यंतिनेतरेतद्विदोजनाः ॥ २५ ॥

मान्याह॥सइति ॥ त्रयीविद्यास्त्रीभाषाइत्येकैकमभिन्नमेववानामद्वयम् ॥ द्वितीयपक्षेस्त्रीभाषाबालभाषेत्यर्थः॥अक्षरानित्यास्फोटरूपाव्यंजनरूपावास्वराषो
डशस्वररूपाउदात्तादिस्वररूपावा॥ २२॥सरस्वतीजन्यमिथुनमाह॥सरस्वतीति ॥ अत्राप्यंतर्हितस्तमोगुणोस्त्येव ॥२३॥२४॥एवमिति॥पूर्वंपुरुषाभावेपि
स्वयमेवपुरुषरूपाअपितिस्रःशक्तयोजाताइत्यर्थः॥तदिदंचर्मचक्षुषामदृश्यमित्याह॥चक्षुष्मंतइति ॥ ज्ञानस्यैवमुख्यचक्षुष्ट्वंनचर्मणइतिचक्षुष्मतोज्ञानिनोनुपश्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीतिनतद्भिन्नाइतरेअतद्विदइतिच्छेदः॥अयंभावः ॥कथंस्त्रियःपुरुषत्वंप्रपेदिरेनैतद्बुद्धिगम्यंभवतीतियेवंदतितान्प्रतिकटाक्षेणमुनिराहं ॥ सत्यंभवद्बुद्धिगम्यनं भवतीति॥ज्ञानिनांतुमायाशक्तिसामर्थ्यविदांनैतदाश्चर्यभूतमिति॥२५॥अनंतरंकृत्यमाह ॥ ब्रह्मणइति॥त्रयींसरस्वतीम्॥२६॥ इत्थंपरस्परविवाहेजातेनंत रंसृष्टिमाह स्वरयेति ॥ इदंचमिथुनत्रयंकारणदेहसूक्ष्मदेहस्थूलदेहानामभिमानीतितापनीयादौस्पष्टम् ॥ तत्रपूर्वकल्पेयोविरिंचिः ॥ सस्वरयाशक्त्यायुक्तः सन्प्रलयकालेसर्वप्राणिकर्मवृंदंस्वाधिष्ठितमेकत्रांडरूपंकृत्वासुषुप्तौसंस्थाप्यस्वयंलीयतइतिपूर्वमवादिष्म तदभिप्रायेणाह ॥ स्वरयेत्यनेनअजीजनत्पूर्वकल्पेइ त्यर्थः ॥ तत्रसुषुप्तेरभिमानीगौरीसहितोरुद्रःसोस्मिन्कल्पेप्रलयचरमकालेतद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतेइतिश्रुत्युक्तरीत्यानामरू

ब्रह्मणेप्रददौपत्नींमहालक्ष्मीर्नृपत्रयीम् ॥ रुद्रायगौरींवरदांवासुदेवायचश्रियम् ॥२६॥ स्वरयासहसंभूयविरिंचोंडमजीजनत् ॥ बिभेदभ गवान्रुद्रस्तद्गौर्यासहवीर्यवान् ॥२७॥ अंडमध्येप्रधानादिकार्यजातमभून्नृप ॥ महाभूतात्मकंसर्वंजगत्स्थावरजंगमम् ॥२८॥ पुपोषपाल यामासतल्लक्ष्म्यासहकेशवः ॥ संजहारजगत्सर्वंसहगौर्यामहेश्वरः ॥ २९ ॥ महालक्ष्मीर्महाराजसर्वसत्त्वमयीश्वरी ॥ निराकाराचसाकारा सैवनानाभिधानभृत् ॥ ३० ॥

पविवेचनरूपभेदनेनसुषुप्तौलीनंतदंडंबिभेदेत्यमुमर्थमाह ॥ बिभेदेति ॥ २७ ॥ अंडमध्येकिमासीत्तदाह ॥ अंडेति ॥ सुषुप्तौकस्यापिभानाभावेनलीनांड मध्येप्रधानादिस्थितिरुक्तायुक्तैवेति ॥ २८ ॥ तदेवनामरूपाभ्यांव्याकृतंजगल्लक्ष्म्या सहितः केशवः सूक्ष्मदेहाभिमानीपुपोष तदेवपालयामासेत्यर्थः ॥ य थावापुपोषतथैवपालयामासेत्यर्थः तदेवपुनः संहारकालेगौर्यासहमहेश्वरः स्वसृष्टमेवजगत्संजहारनाशितवान् ॥ २९ ॥ तथाचपूर्वोक्तरीत्याश्रुत्युक्तसृष्ट्या दिविषयेएवास्यग्रंथस्यतात्पर्यम्॥नसगुणपरिच्छिन्नरूपेभ्योब्रह्मादिदेहेभ्यः सृष्टिरित्यत्रउक्तसृष्ट्यादिश्रुतिविरोधात् ॥ अत्रब्रह्मादिशब्देनचतदधिष्ठितंश्रुत्युक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूक्ष्मंतत्त्वमुच्यतेइतिनकोपिदोषः ॥ इत्थंयस्याःप्रभावःसर्वप्रपंचसर्जनरूपस्तदधिष्ठातृब्रह्मादिसर्जनरूपश्चसामहालक्ष्मीः कियत्पर्यंतंवर्णनीयेत्यभिप्रायेणा
ह ॥ महालक्ष्मीरिति ॥ निराकारानिर्गुणापिसैवमहालक्ष्मीःसाकारासगुणापिसैवनानाभिधानभृत्इति ॥ तथाचश्रुतिःदेव्यथर्वशिरसि ॥ एकैवसर्वत्रवर्तते
तस्मादुच्यतेएकाएकैवविश्वरूपिणीतस्मादुच्यतेअनेकेति ॥ ३० ॥ इत्थमध्यारोपमुक्त्वापवादमाह ॥ नामांतरैरिति ॥ सगुणवाचकैःसत्यज्ञानचिन्महा
मायादिशब्दरूपैर्नामांतरैरेषानिरूप्यालक्षणीयानतुस्वनाम्नाअन्येनवाकेनचित्प्रत्यक्षादिनाप्रमाणेनबोध्येतिशेषः ॥ तथाचश्रुतिः ॥ ज्ञानानांचिन्मयातीताशू
न्यानांशून्यसाक्षिणी ॥ यस्याःपरतरंनास्तिसैषादुर्गाप्रकीर्तिता ॥ यतोवाचोनिवर्तंते अप्राप्यमनसासहेति ॥ सार्धत्रिंशत्समाख्याताःश्लोकास्त्वत्रसुसंस्कृ

नामांतरैर्निरूप्यैषानाम्नानान्येनकेनचित्॥इतिप्राधानिकंरहस्यम् ॥ ४ ॥ ऋषिरुवाच ॥ त्रिगुणातामसीदेवीसात्त्विकीयात्रिधोदिता ॥
साशर्वाचंडिकादुर्गाभद्राभगवतीर्यते ॥ १ ॥ योगनिद्राहरेरुक्तामहाकालीतमोगुणा ॥ मधुकैटभनाशार्थंयांतुष्टावांबुजासनः ॥ २ ॥
दशवक्त्रादशभुजादशपादांजनप्रभा ॥ विशालयाराजमानात्रिंशल्लोचनमालया ॥ ३ ॥ स्फुरद्दशनदंष्ट्रासाभीमरूपापिभूमिप ॥ रूपसौ
भाग्यकांतीनांसाप्रतिष्ठामहाश्रियः ॥ ४ ॥ खड्गबाणगदाशूलचक्रशंखभुशुंडिभृत् ॥ परिघंकार्मुकंशीर्षंनिश्च्योतद्रुधिरंदधौ ॥५॥

ताः ॥ इति श्रीशैवोपनामकरंगनाथभट्टसुतलक्ष्मीगर्भजनीलकंठभट्टकृतं प्राधानिकरहस्यविवरणं समाप्तम् ॥ ४ ॥ इदानीमेतासामेवमूर्तीनांध्यानांतराण्याह ॥
ऋषिरुवाच ॥ त्रिगुणेति ॥ पूर्वोक्तरीत्यारजोगुणविशिष्टायामूललक्ष्म्यास्त्रिगुणात्मिकायाभेदाभावेनोभयोरपिग्रहणंत्रिगुणापदेनोच्यते ॥ शर्वाणीतिवक्तव्ये
शर्वेत्युक्त्यापुंसंबंधाभावबोधनेनस्वातंत्र्यमासांबोधितम् ॥ त्रिविधापिसावस्तुतएकैवेतिसैवैतैर्नामभिरीर्यते ॥ १ ॥ याहरेर्योगनिद्राधिष्ठातृत्वेनोक्तासेत्यर्थः ॥
तस्याध्यानांतरंश्रृण्वित्यर्थः ॥ २ ॥ दशभुजापंचदक्षिणहस्ता।पंचवामहस्ता एवंपादाअपि प्रतिवक्त्रंनेत्रत्रयम् ॥ ३ ॥ शत्रूणांभीमरूपापिभक्तानांरूपसौभाग्य
दात्र्यस्त्येवेत्यर्थः ॥ ४ ॥ दक्षिणाधःकरमारभ्यवामाधःकरपर्यंतमायुधान्याह ॥ खड्गेति ॥ निश्च्योतद्रुधिरंशीर्षंमुंडमित्यर्थः ॥ केचित्तुखट्वांगमाहुः ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ६ ॥ सर्वेति समहालक्ष्म्याअवतारइत्यर्थः ॥७॥ आननस्यशिवांशजन्यत्वाच्छ्वेतत्वमित्यादिकंमध्यमचरित्रानुरोधेनोह्यम् ॥ ८ ॥ ९ ॥ अत्रसहस्रश
ब्दोनंतवाची ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ सरस्वतीध्यानमाह ॥ गौरीति ॥ १४ ॥ १५ ॥ १६ ॥ प्रथमप्रश्नसमाधानमुपसंहरन्नेवद्वितीयप्रश्न

एषासावैष्णवीमायामहाकालीदुरत्यया ॥ आराधितावशीकुर्यात्पूजाकर्तुश्चराचरम् ॥ ६ ॥ सर्वदेवशरीरेभ्योयाविर्भूतामितप्रभा ॥
त्रिगुणासामहालक्ष्मीःसाक्षान्महिषमर्दिनी ॥ ७ ॥ श्वेताननानीलभुजासुश्वेतस्तनमंडला ॥ रक्तमध्यारक्तपादानीलजंघोरुरुन्मदा ॥८॥
सुचित्रजघनाचित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपनाकांतिरूपसौभाग्यशालिनी ॥ ९ ॥ अष्टादशभुजापूज्यासासहस्रभुजासती ॥
आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात्॥१०॥अक्षमालाचकमलंबाणोसिःकुलिशंगदा ॥ चक्रंत्रिशूलंपरशुःशंखोघंटाचपाशकः ॥११॥
शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः ॥ अलंकृतभुजामेभिरायुधैःकमलासनाम् ॥ १२ ॥ सर्वदेवमयीमीशांमहालक्ष्मीमिमांनृप ॥
पूजयेत्सर्वलोकानांसदेवानांप्रभुर्भवेत्॥१३॥गौरीदेहात्समुद्भूतायासत्त्वैकगुणाश्रया ॥ साक्षात्सरस्वतीप्रोक्ताशुंभासुरनिबर्हिणी॥ १४ ॥
दधौचाष्टभुजाबाणमुसलेशूलचक्रभृत् ॥ शंखंघंटांलांगलंचकार्मुकंवसुधाधिप ॥ १५ ॥ एषासंपूजिताभक्त्यासर्वज्ञत्वंप्रयच्छति ॥ निशुं
भमथिनीदेवीशुंभासुरनिबर्हिणी ॥ १६ ॥ इत्युक्तानिस्वरूपाणिमूर्तीनांतवपार्थिव ॥ उपासनंजगन्मातुःपृथगासांनिशामय ॥ १७ ॥

स्योत्तरंप्रतिजानीते ॥ इत्युक्तेति ॥ जगन्मातुस्तप्तकांचनवर्णाभेत्यनेनोक्तायामहालक्ष्म्याउपासनम् ॥ आसांचमहाकाल्यादीनांतिसृणांचपृथग्भिन्नंभिन्नमु
पासनंनिशामयेत्यर्थः ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदामहालक्ष्मीश्चतुर्भुजातप्तकांचनेतिध्यानोक्तापूज्यातदातांमध्येस्थानेसंपूज्यतस्याएवप्रत्यासत्त्यादक्षिणोतरभागयोर्दक्षिणभागेचतुर्भुजांमहाकालीमुत्तरेवामभा
गेमहासरस्वतींचतुर्भुजांपूजयेत् ॥ देवतात्रयमपिचतुर्भुजंपूर्वोक्तायुधचतुष्टयविशिष्टमेवपूज्यम् ॥ पृष्ठतःएतासांपृष्ठभागेमिथुनत्रयंपूजयेदित्यर्थः ॥ १८ ॥
तत्रापिस्थानान्याह ॥ विरिंचिरिति ॥ महालक्ष्म्याःपृष्ठभागेदक्षिणे ॥ विरिंचेर्दक्षिणेमहाकाल्याःपृष्ठभागेवामे ॥ विरिंचेर्वामेसरस्वत्याःपृष्ठभागेइत्यर्थः ॥
मध्यस्थदेवीत्रयस्यपुरतोवक्ष्यमाणंदेवतात्रयंपूजयेत् ॥ १९ ॥ तदेवदेवतात्रयमाह ॥ अष्टेति ॥ महालक्ष्म्याःसंमुखंमध्येअष्टादशभुजामहालक्ष्मीःपूज्या ॥
अस्याअष्टादशभुजायावामभागेचतुर्भुजमहाकालीसंमुखंदशाननाकालीपूज्या ॥ अस्याएवाष्टादशभुजायादक्षिणेभागेअष्टभुजांसरस्वतींचतुर्भुजसरस्वत्याअग्रे

महालक्ष्मीर्यदापूज्यामहाकालीसरस्वती ॥ दक्षिणोत्तरयोःपूज्येपृष्ठतोमिथुनत्रयम् ॥ १८ ॥ विरिंचिःस्वरयामध्येरुद्रोगौर्याश्चदक्षिणे ॥
वामेलक्ष्म्याहृषीकेशःपुरतोदेवतात्रयम् ॥१९॥ अष्टादशभुजामध्येवामेचास्यादशानना ॥ दक्षिणेष्टभुजालक्ष्मीर्महतीतिसमर्चयेत्॥२०॥

पूजयेत् ॥ लक्ष्मीर्महतीत्यत्रद्वितीयाभावः ॥ इतिशब्देनकर्मत्वस्याभिधानात् ॥ इत्थंचतुर्भुजमहालक्ष्म्याःपूजेत्यर्थः ॥ अत्रचतुर्भुजमहाकाल्याश्चतुर्भुजमहा
सरस्वत्याश्चस्वातंत्र्येणपूजानास्ति ॥ चतुर्भुजमहालक्ष्म्यपेक्षयातयोःस्वातंत्र्याभावात्तयोरस्यांपूजायांस्थितत्वादेवंप्रकारपूजयैवतयोरपिपूजासिध्यतीतितयो
रुपासकेनापितथैवपूजाकर्तव्या ॥ तदुक्तंलक्ष्मीतंत्रे ॥ इत्थमेवार्चनाप्रोक्तातयोःशक्त्योर्नराधिपेति ॥ तदयंनिर्गलितोर्थः ॥ भूर्जपत्रेस्वर्णादिपट्टे
वास्थंडिलेवानवकोष्ठंयंत्रंकृत्वातत्रप्रथमपंक्तावीशानकोणादग्निकोणपर्यंतंरुद्रगौर्यौविरिंचिसरस्वत्यौविष्णुलक्ष्म्यौपूजयेत् ॥ मध्यमपंक्तौक्रमेणोत्तरकोष्ठादिद
क्षिणांतंमहाकालीमहालक्ष्मीमहासरस्वतीत्रयंतृतीयपंक्तौवायुकोणान्निर्ऋतिकोणपर्यंतंदशाननाष्टादशभुजाष्टभुजाःपूजयेदिति ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधुनाकेवलाष्टादशभुजादशाननाष्टभुजानामवताराणांपृथक्पूजामाह ॥ अष्टेति ॥ अष्टादशभुजाचैषावादशाननाचवाष्टभुजायदापूज्यातदाएतासांदेवतानांदक्षिणेभागेकालमुत्तरेमृत्युंचपूजयेदित्युत्तरेणान्वयः ॥ २१ ॥ तत्राष्टभुजापूजायांविशेषमाह ॥ यदेत्युत्तरेणान्वयः ॥ २२ ॥ नवशक्तयःशैलपुत्र्याद्याः ॥ तथादक्षिणोत्तरयोरुद्रविनायकौचसंपूज्यौ ॥ अयमपिद्वितीयपक्षःसरस्वतीपूजायामस्तिनत्वनेनपूर्वपक्षस्यवाबाधस्तस्यवैयर्थ्यापत्तेः ॥ तथाचसरस्वतीपूजायांविकल्पःफलितः ॥ प्रसंगात्पूजाचतुष्टयेपिस्तोत्रमंत्रानाह ॥ नमइति ॥ स्तोत्रैरितिबहुवचनेनचरित्रत्रयांतर्गतस्तोत्रैरपिप्रथमपूजायां

अष्टादशभुजाचैषायदापूज्यानराधिप ॥ दशाननाचाष्टभुजादक्षिणोत्तरयोस्तदा ॥ २१ ॥ कालमृत्यूचसंपूज्यौसर्वारिष्टप्रशांतये ॥ यदाचाष्टभुजापूज्याशुंभासुरनिबर्हिणी॥२२॥ नवास्याःशक्तयःपूज्यास्तथारुद्रविनायकौ ॥ नमोदेव्याइतिस्तोत्रैर्महालक्ष्मींसमर्चयेत्॥२३॥ अवतारत्रयाचार्यांस्तोत्रमंत्रास्तदाश्रयाः ॥ अष्टादशभुजाचैषापूज्यामहिषमर्दिनी ॥ २४ ॥ महालक्ष्मीर्महाकालीसैवप्रोक्तासरस्वती ॥ ईश्वरीपुण्यपापानांसर्वलोकमहेश्वरी ॥ २५ ॥ महिषांतकरीयेनपूजितासजगत्प्रभुः ॥ पूजयेज्जगतांधात्रींचंडिकांभक्तवत्सलाम्॥ २६ ॥ अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्तथाक्षतैः ॥ धूपैर्दीपैश्चनैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ २७ ॥

स्तुतिःकर्तव्येत्यर्थः ॥ २३ ॥ अवतारेति ॥ पृथगवतारत्रयेतुतत्तद्देवताचरित्रांतर्गततत्तत्स्तोत्रेणैवस्तुतिःकर्तव्येत्यर्थः ॥ अवतारत्रयेपिमहालक्ष्मीपूजयैवेतरयोःपूजयोर्गतार्थत्वमाह ॥ अष्टेति ॥ २४ ॥ तत्रहेतुमाह ॥ महालक्ष्मीरिति॥यतोमहालक्ष्म्येवेतरस्वरूपातस्मात्सैवपूज्येत्यर्थः ॥ तयोरपेक्षयामहालक्ष्म्याः पूर्वोक्तरीत्यामूलप्रकृत्यासहप्रत्यासत्त्याधिक्यात् ॥ अन्यत्स्पष्टार्थमेव ॥ २५ ॥ २६ ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु ॥ बलिमांसादिपूजेयं विप्रवर्ज्यमियेरिता ॥ तेषांकिल सुरामांसे नेच्छा पुष्पा नृप क्वचित् ॥

रुधिराक्तेनेति ॥ इदंचब्राह्मणातिरिक्तविषयम् ॥ तथाचश्रुतिरुत्तरतंत्रेवार्तिककारैर्मीमांसकाचार्यैरुक्ता ॥ यन्माल्यमासीत्तत्पश्चात्पर्यौहत्सुरावैमाल्यंततो राजन्यमसृजततस्माज्जायांश्वकनीयांश्वश्वशुरश्वस्नुषाचश्वश्रूश्वसुरांपीत्वाविलपंतआसतेपाप्मावैमाल्यंतस्माद्ब्राह्मणःसुरांनपिबेत्पाप्मनासंसृज्यतइति ॥ तत्रैव ॥ गौडीपैष्टीतथामाध्वीविज्ञेयात्रिविधासुरा ॥ यथैवैकातथासर्वानपेयाब्रह्मवादिभिरिति ॥ नसुरापिबेदितितैत्तिरीयश्रुतिरपि ॥ तथाकूर्मपुराणादिसर्वपुराणेषु । कूर्मपुराणेद्वादशाध्याये ॥ नचवेदादृतेकिंचिच्छास्त्रंधर्माभिधायकम् ॥ योयथारमतेविप्रोनसंभाष्योद्विजातिभिः ॥ यानिशास्त्राणिदृश्यंतेलोकेस्मिन्विविधानितु ॥ श्रुतिस्मृतिविरुद्धानिनिष्ठातेषांहितामसी ॥ कापालंभैरवंचैवयामलंवाममार्हतम् ॥ एवंविधानिचान्यानिमोहनार्थानितानितु ॥ येकुशास्त्राभियोगेनमोहयंतीहमानवान् ॥ मयासृष्टानिशास्त्राणिमोहायैषांभवांतरे ॥ एवंसर्वपुराणेषु ॥ तथाकालिकापुराणे ॥ अवश्यंविहितंयत्रमद्यंतत्रद्विजःपुनः ॥ नारिकेलजलंकांस्येपात्रेवाविसृ

रुधिराक्तेनबलिनामांसेनसुरयानृप ॥ प्रणामाचमनीयेनचंदनेनसुगंधिना ॥ २८ ॥
सकर्पूरैश्चतांबूलैर्भक्तिभावसमन्वितैः ॥ वामभागेग्रतोदेव्याश्छिन्नशीर्षंमहासुरम् ॥ २९ ॥

जेन्मधु ॥ सिंहव्याघ्रादिकंदत्त्वाचात्मवध्यामवाप्नुयात् ॥ मद्यंदत्त्वाब्राह्मणस्तुब्राह्मण्यादेवहीयतेइति ॥ पशुहिंसानकर्तव्याब्राह्मणेनकदाचन ॥ बलिदानेयदोक्तास्यात्तत्रपैष्टंनियोजयेदिति ॥ पैष्टंपिष्टनिर्मितंपशुंकृत्वातस्यबलिंनियोजयेदित्यर्थः । तथाचिद्वल्लीतंत्रमेरुतंत्रमहाकालसंहितादक्षिणाचारतंत्रराजादिसर्वतंत्रेषु ॥ मद्यंदत्त्वाब्राह्मणस्तुब्राह्मण्यादेवहीयते ॥ नकर्तव्यंनकर्तव्यंनकर्तव्यंकदाचन ॥ इदंतुसाहसंदेविनकर्तव्यंकदाचनेत्यादि ॥ ननुतंत्रेषुब्राह्मणस्यापिवामाचारप्रतिपादकानिवचनानिदृश्यंतेतेषांकागतिरितिचेत् ॥ भ्रष्टब्राह्मणविषयाणितानीतिब्रूमः । तदप्युक्तंचिद्वल्लीतंत्रे ॥ तंत्राणिद्विविधानीहमयाप्रोक्तानिपार्वति ॥ श्रुतिस्मृत्यविरुद्धानितद्विरुद्धानिचैवहि ॥ वेदेनाधिकृतानांतुब्राह्मणानांगतेर्वशात् ॥ तद्विरुद्धानिचोक्तानिनैवग्राह्याणिवैदिकैरित्यादि ॥ स्कांदेवायुसंहितायाम् । शैवागमोपिद्विविधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौताश्रौतश्चतद्विधः॥श्रुतिसारमयःश्रौतःस्वतंत्रइतरोमतइत्यादिश्रौतोग्राह्यस्तुवैदिकैरिति ॥ ननुतंत्रस्मृतिविरोधात्सुरामांसनिषेधश्रुतिरसंस्कृतसुरामांसभक्षण परास्त्विवतिचेन्न॥दुर्बलस्मृतिविरोधेनप्रबलश्रुतेःसंकोचस्यशास्त्रकारैरनंगीकारात्॥मीमांसाप्रथमपादेस्पष्टमेतत्॥ ननुकालिकात्रिपुरोपनिषदादिश्रुतिप्रामाण्या त्तन्निषेधकश्रुतेःसंकोचोस्त्विवतिचेन्न ॥ कालिकाद्युपनिषद्घटितशाखानामुच्छिन्नत्वात्कालिकाद्युपनिषत्सुकल्पितत्वसंदेहादिदमपिमीमांसाप्रथमपादेस्पष्टम् ॥ एवंसतिसर्वतंत्राणांप्रामाण्यमधिकारिभेदेनैवाव्याहतम् ॥ अतएवस्कांदेसूतसंहितायांपुराणांतरेचतंत्रप्रामाण्यप्रस्तावे॥मृषावादीकथंशिवइत्यादिवचनैरधिका रिभेदेनैवतंत्रप्रामाण्यंसमर्थितंविस्तरेणचैतन्मत्कृततंत्रप्रामाण्यविमर्शिन्यांद्रष्टव्यम् ॥ एतेनकैश्चित्सप्तशतीटीकायांतंत्राणामप्रामाण्यंसमर्थितंतत्किंचिज्ज्ञात्व

पूजयेन्महिषंयेनप्राप्तंसायुज्यमीशया ॥ दक्षिणेपुरतःसिंहंसमग्रंधर्ममीश्वरम् ॥ ३० ॥
वाहनंपूजयेद्देव्याधृतंयेनचराचरम् ॥ यःकुर्यात्प्रयतोधीमांस्तस्याएकाग्रमानसः ॥ ३१ ॥

मूलकंनास्तिकत्वमूलकंचेतिसुधीभिराकलनीयम् ॥तंत्रनिषेधकवचनानांतदुदाहृतानांवेदविरुद्धतंत्रविषयत्वादित्यादिकंसर्वमत्कृततंत्रप्रामाण्यविमर्शिन्यांद्रष्ट व्यम् ॥ अत्रापिराजानंप्रत्येवमुनिनाकथितत्वाद्बुधिराक्तेनेत्यादिकंब्राह्मणातिरिक्तविषयकमेवेतिबोध्यम् ॥ २८ ॥ २९ ॥ प्राप्तंसायुज्यमीशया ॥ एते नवैरिष्वपिभगवत्याजगन्मातुर्वात्सल्यंदर्शितम्॥अतएववैरिष्वपिप्रकटितैवदयात्वयेत्थमित्युक्तम् ॥ योधीमानेकाग्रमानसःप्रयतस्तस्याःपरमेश्वर्याःपूजांकुर्या त्ससिंहंधर्मात्मकंपूजयेदित्यग्रिमेणान्वयः ॥ अनेनचसिंहस्यवासनात्मकरूपमुक्तंवेदितव्यम् ॥ धर्मवाहनत्वकथनेनानेकजन्मपुण्यवंतःसर्वधर्मात्मानएवपुरुषा एतांदेवतांप्राप्नुवंतिनान्येइत्युक्तंभवति॥तदुक्तंब्रह्मांडपुराणे॥यस्यनोपश्चिमंजन्मयदिवाशंकरःस्वयम्॥तेनैवलभ्यतेविद्याश्रीमत्पंचदशाक्षरीति ॥ ३० ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमतःकवचंततोर्गलांततःकीलकंततोरात्रिसूक्तंततोनवार्णमंत्रजपः मध्येचरित्रत्रयंपुनर्नवार्णंततोदेवीसूक्तंततोरहस्यत्रयमित्येवंक्रमेणस्तुवीतेत्यर्थः ॥ विस्तरेणचएतदग्रेवक्ष्यामः ॥ यदिसमग्रंपाठंकर्तुंनशक्नोतितंप्रत्याह ॥ एकेनेति ॥ एकेनचेत्स्तुवीततदामध्यमेनैवस्तुवीतेत्यर्थः ॥ महालक्ष्म्यामूलप्रकृत्यभेदेनसर्वदेवतात्मकत्वात्तच्चरित्रपाठेनसर्वदेवतास्तृप्यंतीतिभावः ॥ पूर्वोक्तपूजाचतुष्टयेप्येषविधिर्बोध्यः ॥ इतरयोश्चरितयोर्मध्येएकेननस्तुवीतेत्यर्थः॥ ३२ ॥ ॥ ३३ ॥ प्रतिश्लोकंप्रतिमंत्रमित्यर्थः ॥ तेचमंत्राःसप्तशतीस्तोत्रसंबंधिनः कात्यायनीतंत्रप्रदर्शिताः सप्तशतसंख्याकाः मार्कंडेयउवाचस्वाहाइत्यादिकाः ॥ अत्रकेचित्कवचादित्रयस्यरहस्यत्रयस्यचप्रतिश्लोकंहोममनुतिष्ठंति ॥ तत्रकवचांशेहोमोनयुक्तस्तंत्रांतरेनिषेधात् ॥ चंडीस्तवेप्रतिश्लोकमेकाहुति

ततःकृतांजलिर्भूत्वास्तुवीतचरितैरिमैः ॥ एकेनवामध्यमेननैकेनेतरयोरिह ॥ ३२ ॥ चरितार्धंतुनजपेज्जपच्छिद्रमवाप्नुयात् ॥ प्रदक्षिणांनमस्कारान्कृत्वामूर्ध्नाकृतांजलिः ॥ ३३ ॥ क्षमापयेज्जगद्धात्रींमुहुर्मुहुरतंद्रितः ॥ प्रतिश्लोकंतुजुहुयात्पायसंतिलसर्पिषा ॥ ३४ ॥ जुहुयात्स्तोत्रमंत्रैर्वाचंडिकायैशुभंहविः ॥ भूयोनामपदैर्देवींपूजयेत्सुसमाहितः ॥ ३५ ॥ प्रयतःप्रांजलिःप्रह्वःप्रणम्यारोप्यचात्मनि ॥ सुचिरंभावयेदीशांचंडिकांतन्मयोभवेत् ॥ ३६ ॥

रिहेष्यते ॥ रक्षाकवचगैर्मंत्रैर्होमंतत्रनकारयेत् ॥ मौर्ख्यात्कवचगैर्मंत्रैःप्रतिश्लोकंजुहोतियः ॥ स्याद्देहपतनंतस्यनरकंचप्रपद्यते ॥ अंधकाख्योमहादैत्योदुर्गाभक्तिपरायणः ॥ कवचाहुतिजात्पापान्महेशेननिपातितइति ॥ ३४ ॥ एतावदशक्तस्यपक्षांतरमाह ॥ जुहुयादिति ॥ स्तोत्रमंत्रैः रात्रिसूक्तादिस्तोत्रस्थमंत्रैरित्यर्थः ॥ केचित्तुस्तोत्रमंत्रशब्देननवार्णमंत्रमित्याहुः ॥ तन्मंदम् ॥ प्रमाणाभावात् ॥ बहुत्वानुपपन्नंस्याच्च ॥ अयंचहोमः प्रकरणान्नित्यपूजांगभूतः ॥ ३५ ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्याःपूजायाः काम्यत्वंनित्यत्वंक्रमेणाह ॥ एवंयइतिद्वाभ्याम् ॥ ३७ ॥ ३८ ॥ उपसंहरति ॥ तस्मादिति ॥ ३९ ॥ श्लोकाश्चैको नचत्वारिंशत्संख्यास्त्वत्रकीर्तिताः ॥ इतिश्रीशैवोपनामकरंगनाथभट्टसुतलक्ष्मीगर्भजनीलकंठकृतंवैकृतिकरहस्यविवरणंसमाप्तम् ॥ ५ ॥ एकादशाध्यायां तेसप्तशत्यांलोकरक्षार्थंभविष्यमाणायेनंदजादयोवताराः कथितास्तेषांध्यानमुपास्तिंचाह ॥ नंदेति विंध्यवासिनीयम् ॥ १ ॥ कनकेहिरण्येउत्त

एवंयःपूजयेद्भक्त्याप्रत्यहंपरमेश्वरीम् ॥ भुक्त्वाभोगान्यथाकामंदेवीसायुज्यमाप्नुयात् ॥३७॥ योनपूजयतेनित्यंचंडिकांभक्तवत्सलाम्॥ भस्मीकृत्यास्यपुण्यानिनिर्दहेत्परमेश्वरी ॥३८॥तस्मात्पूजयभूपालसर्वलोकमहेश्वरीम्॥यथोक्तेनविधानेनचंडिकांसुखमाप्स्यसि ॥३९॥ इति वैकृतिकरहस्यम् ॥ ५ ॥ ऋषिरुवाच ॥ ॥ नंदाभगवतीनामयाभविष्यतिनंदजा॥ सास्तुतापूजिताभक्त्यावशीकुर्याज्जगत्त्रयम् ॥ ॥ १ ॥ कनकोत्तमकांतिःसासुकांतिकनकांबरा ॥ देवीकनकवर्णाभाकनकोत्तमभूषणा ॥ २ ॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिराकमलालक्ष्मीःसाश्रीरुक्मांबुजासना ॥ ३ ॥ यारक्तदंतिकानामदेवीप्रोक्तामयानघ ॥ तस्याःस्वरूपंवक्ष्यामिशृणुसर्वभयापहम् ॥ ४ ॥ रक्तांबरारक्तवर्णारक्तसर्वांगभूषणा ॥ रक्तायुधारक्तनेत्रारक्तकेशातिभीषणा ॥ ५ ॥ रक्ततीक्ष्णनखारक्तदशनारक्तदंतिका ॥ पतिंनारीवानुरक्तादेवीभक्तंभजेज्जनम् ॥ ६ ॥ वसुधेवविशालासासुमेरुयुगुलस्तनी ॥ दीर्घौलंबावतिस्थूलौतावतीवमनोहरौ ॥ ७ ॥

माकांतिरिच्छायस्याःसा ॥ २ ॥ पाशाब्जैरित्यत्रअब्जःशंखः ॥ चक्रंशंखवराभयानिदधतीतिशारदायांविंध्यवासनीध्यानेउक्तत्वात् ॥ कमलस्यैकवारंग्रहणाच्च ॥ ३ ॥ अथरक्तदन्तिकामाह ॥ येति ॥ ४ ॥ ५ ॥ रक्तदंतिकानामिकादेवीत्यर्थः ॥ पतिंनारीवेतिदृष्टांतोऽनुरागमात्रांशेज्ञेयः ॥६॥ दीर्घलंबावित्यत्रतिर्यग्लंबायमानतैवगृह्यतेनत्वधःपतनमतिस्थूलौकर्कशाविति विशेषणात् ॥ दीर्घालंबेतिपुनरुक्त्यातुअतिदीर्घावित्यर्थः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमित्यतिस्थूलौजातावित्यतआह ॥ सर्वेति॥ सर्वानंदरसभरितत्वादतिस्थूलावित्यर्थः ॥ तदपिकिमर्थमितिचेद्भक्तपानार्थमित्याह ॥ भक्तानिति ॥ तेना
तिशयदयावतीयमितिफलितम् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ शिलीमुखापूर्णबाणपूर्णमित्यर्थः ॥ १३ ॥ १४ ॥ धनुर्बाणपद्मशाका

कर्कशावतिकांतौतौसर्वानंदपयोनिधी ॥ भक्तान्संपाययेद्देवीसर्वकामदुघौस्तनौ ॥ ८ ॥ खड्गपात्रंचमुसलंलांगलंचबिभर्तिसा ॥ आख्या
तारक्तचामुंडादेवीयोगेश्वरीतिच ॥ ९ ॥ अनयाव्याप्तमखिलंजगत्स्थावरजंगमम् ॥ इमांयःपूजयेद्भक्त्यासव्याप्नोतिचराचरम् ॥ १० ॥
अधीतेयइमंनित्यंरक्तदंत्यावपुस्तवम् ॥ तंसापरिचरेद्देवीपतिंप्रियमिवांगना ॥ ११ ॥ शाकंभरीनीलवर्णानीलोत्पलविलोचना ॥ गंभी
रनाभिस्त्रिवलीविभूषिततनूदरी ॥ १२ ॥ सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥ मुष्टिंशिलीमुखापूर्णकमलंकमलालया ॥ १३ ॥
पुष्पपल्लवमूलादिफलाढ्यंशाकसंचयम् ॥ काम्यानंतरसैर्युक्तंक्षुत्तृण्मृत्युभयापहम् ॥१४॥ कार्मुकंचस्फुरत्कांतिबिभ्रतीपरमेश्वरी ॥ शा
कंभरीशताक्षीसासैवदुर्गाप्रकीर्तिता ॥ १५ ॥ विशोकादुष्टदमनीशमनीदुरितापदाम् ॥ उमागौरीसतीचंडीकालिकासाचपार्वती ॥१६॥
शाकंभरींस्तुवन्ध्यायञ्जपन्संपूजयन्नमन् ॥ अक्षय्यमश्नुतेशीघ्रमन्नपानामृतंफलम् ॥ १७ ॥ भीमापिनीलवर्णासादंष्ट्रादशनभासुरा ॥
विशाललोचनानारीवृत्तपीनपयोधरा॥१८॥चंद्रहासंचडमरुंशिरःपात्रंचबिभ्रती॥एकवीराकालरात्रिःसैवोक्ताकामदास्तुता ॥१९॥ तेजोमं
डलदुर्धर्षाभ्रामरीचित्रकांतिभृत् ॥ चित्रानुलेपनादेवीचित्राभरणभूषिता ॥ २० ॥

न्बिभ्रतीचतुर्भिर्भुजैरित्यर्थः ॥ देवीभागवतोक्तशताक्षीमूर्त्युपाख्यानरीत्याशताक्षीमूर्तिदुर्गामूर्त्योरवतारांतरत्वाभावेनशाकंभरीपूजयैवदुर्गापूजामुपदिशति ॥
सैवेति ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ चंद्रहासंखड्गम् ॥ १९ ॥ सप्तमीमूर्तिमाह ॥ तेजइति ॥ चित्रकांतिरनेकवर्णकांतिः ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रभ्रमरपाणिः हस्तेअनेकवर्णविशिष्टोभ्रमरोययाधृतः ॥ सचभ्रमरोजीवरूपस्तेनचसर्वेजीवामदधीनाः संतीतिबोधितम् ॥ तदुक्तंभुवनेश्वरीसंहितायाम् ॥ द्विरेफाजीवरूपास्युर्ययाहस्तेधृताःसदा ॥ जीवाधीशाततःप्रोक्ताभ्रामरीलोकसुंदरीति ॥ एतासांदेवतानामुपाख्यानंदेवीभागवतेस्पष्टम् ॥ २१ ॥ २२ ॥ रहस्यत्रयस्याध्ययनंविधत्ते ॥ तस्मादिति ॥ २३ ॥ फलंकथयति ॥ सप्तेति ॥ २४ ॥ उपसंहरति देव्याइति ॥ सर्वकामफलप्रदंधमार्थकाममोक्षप्रदमित्यर्थः ॥ २५ ॥ पंचविंशतिसंख्यास्तुश्लोकाअत्रप्रकीर्तिताः ॥ रक्तांबरादरुणबिंबफलाधरौष्ठाचंद्रार्धबद्धमुकुटात्करुणासमुद्रात् ॥ पाशांकुशाभयवराढ्यकरा

चित्रभ्रमरपाणिःसामहामारीतिगीयते ॥ इत्येतामूर्तयोदेव्याव्याख्यातावसुधाधिप ॥२१॥ जगन्मातुश्चंडिकायाःकीर्तिताःकामधेनवः ॥ इदंरहस्यंपरमंनवाच्यंकस्यचित्त्वया ॥ २२ ॥ आख्यानंदिव्यमूर्तीनामभीष्टफलदायकम्॥तस्मात्सर्वप्रयत्नेनदेवींजपनिरंतरम् ॥२३ ॥ सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ॥ पाठमात्रेणमंत्राणांमुच्यतेसर्वकिल्बिषैः ॥ २४ ॥ देव्याध्यानंतवाख्यातंगुह्याद्गुह्यतरंमहत् ॥ तस्मात्सर्वप्रयत्नेनसर्वकामफलप्रदम् ॥ २५ ॥ इतिमूर्तिरहस्यम् ॥ ६ ॥

त्रिनेत्रादंतःपुरात्पुररिपोरपरंसविभ्रः ॥ १ ॥ श्रीमच्छैवकुलोत्पन्नोरंगनाथात्मजःसुधीः ॥ श्रीलक्ष्मीगर्भसंभूतोनीलकंठाभिधानतः ॥ २ ॥ सप्तशत्यंगषट्कस्यव्याख्यांयःकृतवाञ्छुभाम् ॥ तयातुष्यतुसालक्ष्मीस्तथाश्रीभुवनेश्वरी ॥ ३ ॥ इति श्रीशैवोपनामकरंगनाथसुतलक्ष्मीगर्भसंभवनीलकंठभट्टकृतंसप्तशत्यंगषट्कविवरणं समाप्तम् ॥ ६ ॥ मूलम् ॥ १८१ ॥ टीका ॥ ८२० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहमित्यष्टर्चंत्रयोदशंसूक्तंवागांभृणस्यमहर्षेर्दुहितावाङ्नाम्नीब्रह्मविदूषीस्वात्मानमस्तौत् ॥ अतः साऋषिः ॥ सच्चित्सुखात्मकः सर्वगतः परमात्मादेवता ॥
तेनहितादात्म्यमनुभवंतीसर्वजगद्रूपेणसर्वस्याधिष्ठानत्वेनचअहमेवभवामीतिस्वात्मानंस्तौति ॥ द्वितीयाजगती ॥ शिष्टाः सप्तत्रैष्टुभः ॥ तथाचानुक्रांतम् ॥
अहमष्टौवागांभृणीतुष्टावात्मानं द्वितीयाजगतीतिगतोविनियोगः ॥ अहमिति॥ अहंसूत्रस्यद्रष्ट्रीवागांभृणीवागांभृणंयद्ब्रह्मजगत्कारणंतद्रूपाभवंतीरुद्रेभिः रुद्रैः
एकादशभिः इत्थंभावेतृतीया ॥ तदात्मनाचरामि ॥ एवंवसुभिरित्येतत्तदात्मनाचरामीतियोज्यम्॥ उतापिचआदित्यैः समंचरामि॥उतापिचविश्वदेवैश्च॥
तथामित्रावरुणौ मित्रंचवरुणंच ॥ सुपांसुलुगितिद्वितीयायाआकारः ॥ उभाउभौअहमेवब्रह्मीभूताबिभर्मिधारयामि ॥ इंद्राग्नीअप्यहमेवधारयामि ॥
उभाउभौअश्विनाअश्विनावपिअहमेवधारयामि ॥ मयिहिसर्वंजगत्शुक्तौरजतमिवाध्यस्तंसत्दृश्यते ॥ मायाचजगदाकारेणविवर्त्तते ॥ तादृश्यामायाया

ॐअहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ॥ अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नीअहमश्विनोभा ॥१॥ अहंसोममाहनसंबिभर्म्यहं
त्वष्टारमुतपूषणंभगम् ॥ अहंददामिद्रविणंहविष्मतेसुप्राव्ये३यजमानायसुन्वते ॥२॥ अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञिया
नाम् ॥ तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयंताम् ॥ ३ ॥ आधारत्वेनासंगस्यापिब्रह्मणः उक्तस्यसर्वस्योपपत्तिः॥ १ ॥अहमिति ॥
अहमाहनसंहंतव्यमभिषोतव्यंसोमम् ॥ यद्वा शत्रूणामाहंतारंदिविवर्तमानंदेवतात्मानंसोममहमेवबिभर्मितथात्वष्टारम्॥उतअपिचपूषणंभगमहमेवबिभर्मि ॥
तथाहविष्मतेहविर्युक्तायसुप्राव्येशोभनंहविर्देवानांप्रापयित्रेतर्पयित्रे ॥ अवतेस्तर्पणार्थात् अवितृस्तृतंत्रिभ्यईरितिईकारप्रत्ययः॥चतुर्थ्येकवचनेयणिउदा
त्तस्वरितयोर्यणःस्वरितोनुदात्तस्येत्यनुदात्तस्यसुपःस्वरितत्वम् ॥ सुन्वतेसोमाभिषवंकुर्वते ॥ शतुरनुमइतिचतुर्थ्याउदात्तत्वम् ॥ ईदृशाययजमानायद्र
विणंधनंयागफलरूपम् ॥ अहमेवददामिप्रयच्छामि ॥ एतच्चब्रह्मणः फलदातृत्वंफलमतउपपत्तेरित्यधिकरणेभगवताभाष्यकारेणसमर्थितम् ॥ २ ॥ अहमि
ति॥अहंराष्ट्रीईश्वरनामैतत्॥सर्वस्यजगतः ईश्वरी ॥ तथावसूनांधनानांसंगमनीसंगमयित्रीउपासकानांप्रापयित्री ॥ चिकितुषीयत्साक्षात्कर्त्तव्यंपरंब्रह्मतज्ज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तवतीस्वात्मतयासाक्षात्कृतवती ॥ अतएवयज्ञियानांयज्ञार्हाणांप्रथमामुख्या॥ याएवंगुणविशिष्टाअहंतांमाभूरिस्थात्रांबहुभावेनप्रपंचात्मनातिष्ठमानाम्॥ भूरि
भूरीणिबहूनिभूतजातानिआवेशयंतींजीवभावेनात्मानंप्रवेशयंतीमीदृशींपुरुत्राबहुषुदेशेषुव्यदधुःविदधंतिकुर्वंति ॥ उक्तप्रकारेणवैश्वरूप्येणावस्थानात् ॥ यद्य
त्कुर्वंतितत्सर्वंमामेवकुर्वंतीत्यर्थः ॥ ३ ॥ मयासइति॥ यअन्नमत्तिसःउक्तशक्तिरूपयामयैवान्नमत्ति ॥ यश्चविपश्यतिसोपिमयैवपश्यति ॥ यश्चप्राणितिश्वासो
च्छ्वासादिव्यापारंकरोति ॥ सोपिमयैवप्राणरूपयाकरोति ॥अनप्राणनेअदादिकः रुदादिभ्यःसार्वधातुकेइतीडागमः ॥ अनितेरितिणत्वम् ॥ यश्चपरेणोक्तव
चनंशृणोतिविविधंरूपंपश्यतिसोपिज्ञानशक्त्यात्मिकयामयैवपश्यति ॥सोपिमयैवशृणोति ॥ श्रुश्रवणे श्रुवःशृचेतिश्नुप्रत्ययः धातोःशृभावश्च॥येईदृशीमंतर्या
मिरूपेणस्थितांमांजानंतितेमाममंतवोऽमन्यमानाः अजानंतःउपक्षियंतिउपक्षीणाः संसारेणनहीनाभवंति॥ मनेरौणादिकस्तुप्रत्ययः ॥ नञ्समासेव्यत्ययेनो

मयासोअन्नमत्तियोविपश्यतियःप्राणितियईशृणोत्युक्तम्॥अमंतवोमांतउपक्षियंतिश्रुधिश्रुतंश्रद्धिवंतेवदामि॥४॥अहमेवस्वयमिदंवदामि
जुष्टंदेवेभिरुतमानुषेभिः ॥ यंकामयतेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधाम् ॥ ५ ॥ अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवाउ ॥
अहंजनायसमदंकृणोम्यहंद्यावापृथिवीआविवेश ॥ ६ ॥ दात्तत्वम् ॥ यद्वा भावेतुप्रत्ययः॥ततोबहुव्रीहौनञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् ॥

माममंतवः मद्विषयज्ञानरहिताइत्यर्थः ॥ हेश्रुतविश्रुतसखेश्रुधि मयावक्ष्यमाणंशृणु छांदसोविकरणस्यलुक् ॥ श्रुशृणुपृकृवृभ्यइतिहेधिर्भावः॥ किंतच्छ्रोतव्यंश्र
द्धिवं श्रद्धिःश्रद्धातयायुक्तंश्रद्दधानेनलभ्यमित्यर्थः ॥ श्रदंतरोरुपसर्गवद्वृत्तिरिष्यतइतिश्रच्छब्दस्यउपसर्गवद्वर्तनात् ॥ उपसर्गेघोःकिरितिकिप्रत्ययः मत्वर्थी
योवः ॥ ईदृशंब्रह्मात्मकंवस्तुतेतुभ्यंवदामिउपदिशामि॥ ४ ॥अहमेवेति॥अहंस्वयमेवइदंवस्तुब्रह्मात्मकंवदाम्युपदिशामि॥देवेभिः देवैः इंद्रादिभिरपिजुष्टंसेवि
तम्॥उतापिचमानुषेभिर्मनुष्यैरपिजुष्टम्॥ईदृग्विधात्मिकाहंयंकामयेयंयंपुरुषंरक्षितुमहंवांछामि॥ तंतंपुरुषमुग्रंकृणोमिसर्वेभ्योधिकंकरोमि॥तमेवब्रह्माणंस्रष्टा
रंकरोमि ॥ तमेवऋषिमतींद्रियार्थदर्शनंकरोमि ॥ तमेवसुमेधांशोभनप्रज्ञंचकरोमि॥अष्टमस्यसप्तमेएकादशोवर्गः ॥५ ॥अहमिति ॥ पुरात्रिपुरविजयसमये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रायरुद्रस्य षष्ठ्यर्थेचतुर्थी ॥ महादेवस्यधनुश्चापमहमातनोमिज्ययाआततंकरोमि ॥ किमर्थंब्रह्मद्विषेब्राह्मणानांद्वेष्टारम् ॥ शरवेशरुंहिंसकं
त्रिपुरनिवासिनमसुरम् । हंतवेहंतुंहिंसितुम् ॥ हंतेस्तुमर्थेसेसेनितितवेप्रत्ययः ॥ अंतश्चतवैयुगपदितिआद्यंतयोर्युगपदुदात्तत्वम् ॥ शृहिंसायामित्य
स्मात् शृस्वृस्तुहीत्यादीनाउप्रत्ययः ॥ क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थी ॥ उशब्दःपूरकः ॥ अहमेवसमदंसंमाद्यंत्यस्मिन्निति सम
दंसंग्रामःयोद्धृजनार्थंशत्रुभिःसहसंग्राममहमेवकृणोमिकरोमि ॥ तथाद्यावापृथिवीदिवंचपृथिवींचअंतर्यामितयाअहमेवविवेशप्रविष्टवती ॥ ६ ॥ अहंसुव
इति ॥ द्यौःपितेतिश्रुतेः ॥ पिताद्यौःपितरंदिवमहंसुवेप्रसुवेजनयामि ॥ आत्मनआकाशःसंभूतइतिश्रुतेः ॥ कुत्रेतितदाह ॥ अस्यपरमात्मनःमूर्धन्मूर्धनि
उपरिकारणभूतेतस्मिन्दिवियद्यत्कार्यजातंसर्वंवर्तते ॥ तंतुषुपटइव ॥ ममचयोनिःकारणम् ॥ समुद्रे समुद्रवंत्यस्माद्भूतजातानिइतिसमुद्रःपरमात्मा ॥ तस्मि

अहंसुवेपितरमस्यमूर्धन्ममयोनिरप्स्वंतःसमुद्रे ॥ ततोवितिष्ठेभुवनानुविश्वोतामूंद्यांवर्ष्मणोपस्पृशामि ॥ ७ ॥ अहमेववातइवप्रवाम्या
रभमाणाभुवनाविविश्वा ॥ परोदिवापरएनापृथिव्यैतावतीमहिनासंबभूव ॥ ८ ॥ इति देवीसूक्तम् ॥

न्नप्सुव्यापनशीलासुधीवृत्तिषुअंतर्मध्येयद्ब्रह्मचैतन्यंतन्ममकारणमित्यर्थः ॥ यतःईदृग्भूताहमस्मिततोहेतोःविश्वाविश्वानिसर्वाणिभुवनानिभूतजातानि
अनुप्रविश्यवितिष्ठेविविधंप्राप्यतिष्ठामि ॥ समवप्रविभ्यःस्थइत्यात्मनेपदम् ॥ उतापिचअमूंद्यांविप्रकृष्टदेशेवस्थितंस्वर्गलोकम् उपलक्षणमेतत् ॥ एतदुपलक्षि
तंकृत्स्नंविकारजातंवर्ष्मणाकारणभूतेनमायात्मकेनमदीयेनदेहेनउपस्पृशामि ॥ यद्वा अस्यभूलोकस्यमूर्धन्मूर्धनिउपरिपितरमाकाशंसुवे ॥ समुद्रेजलधौ ॥
अप्सुउदकेषु ॥ अंतःमध्येममयोनिःकारणभूतःअंभृणाख्यऋषिर्वर्तते ॥ यद्वा समुद्रेअंतरिक्षेअप्सुअम्मयेषुदेवशरीरेषुममकारणभूतंब्रह्मचैतन्यंवर्तते ॥ ततो
हंकारात्मिकासतीसर्वाणिभुवनानिव्याप्नोमि ॥ अन्यत्समानंपूर्वेण ॥ ७ ॥ अहमेवेति ॥ विश्वाविश्वानिसर्वाणिभूवनानिभूतजातानिकार्याणिआरभमा
णा कारणरूपेणोत्पादयंतीअहमेवपरेणअनधिष्ठितास्वयमेवप्रवामिप्रवर्ते वातइव यथावातःपरेणाप्रेरितःसन्स्वेच्छयैवप्रवातितद्वत् ॥ उक्तंसर्वंनिगमय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति ॥ परोदिवेति ॥ परइतिसकारांतंपरस्तादित्यर्थेवर्तते ॥ यथाअधइत्यधस्तादर्थेतद्योगेचतृतीयासर्वत्रदृश्यते ॥ दिवःआकाशस्यपरस्तात् ॥ एनापृथिव्याद्वितीयाटौस्स्वेनइतिइदमएनादेशः । सुपांसुलुगितितृतीयाआजादेशः ॥ अस्याःपृथिव्याःपरःपरस्तात् ॥ द्यावापृथिव्योरुपादानमुपलक्षणम् ॥ एतत्उपलक्षितात्सर्वस्माद्भूतजातात्परस्ताद्वर्तमानाअसंगोदासीनकूटस्थब्रह्मचैतन्यरूपाहंमहिनामहिम्नाएतावतीसंबभूव ॥ एतच्छब्देनउक्तंसर्वंपरामृश्यते ॥ एतावत्परिमाणमस्याःयत्तदेतेभ्यःपरिमाणइतिवतुप् ॥ आसर्वनाम्नइत्यात्वम् ॥ सर्वजगदात्मनाअहंसंभूतास्मि ॥ महच्छब्दादिमनिचिटेरितिटिलोपः ॥ ततस्तृतीयायामुदात्तनिवृत्तिस्वरेणतस्याउदात्तत्वम् ॥ छांदसोमलोपः ॥ अष्टमस्यसप्तमेद्वादशोवर्गः ॥ इतिदेवीसूक्तभाष्यम् ॥ ॥ श्रीगणेशायनमः॥ अथैतद्रात्रिसूक्तंरात्रिदेवताप्रतिपादकं सारात्रिदेवताद्वेधाजीवरात्रिरीश्वररात्रिश्चतत्राद्याप्रसिद्धायस्यामस्मदादीनांजीवानांप्रतिदिनंव्यवहारोलुप्यते द्वितीयातुयस्यामीश्वरव्यवहारलोपोभवतिमहाप्रलयकालेतदानीमन्यवस्त्वभावात्केवलंब्रह्ममायात्मकमेववस्तुसर्वकारणमव्यक्तपदवाच्यंतिष्ठतिसाद्वि

ॐरात्रीव्यख्यदायतीपुरुत्रादेव्य१क्षभिः ॥ विश्वाअधिश्रियोधित ॥ १ ॥

तीयारात्रिः ॥ तदुक्तंदेवीपुराणे॥ब्रह्ममायात्मिकारात्रिः परमेशलयात्मिका ॥तदधिष्ठातृदेवीतुभुवनेशीप्रकीर्तितेति॥ तदेवंसर्वोत्तमदेवताप्रतिपादकस्यरात्रिसूक्तस्यभाष्यकारादिभिः कृतव्याख्यानस्यापिविस्पष्टंव्याख्यानंयथामातिक्रियते॥रात्रीति॥यादेवीसर्ववस्तुद्योतनशीलापुरुत्राबहुषुदेशेषुसर्वदेशेषुअक्षभिः प्रकाशमानैरिंद्रियैरुपलक्षणविधयामहदादिभिस्तत्वैर्देवीसर्ववस्तुद्योतनशीलाआयतीआगच्छंतीविद्यमानारात्रीब्रह्ममायात्मिकाव्यख्यत्स्वोत्पादितजगज्जालसदसत्कर्मादिकंप्रथमतोविशेषेणपश्यति ॥ अनंतरंतत्तत्कर्मानुरूपफलरूपाः विश्वाःसर्वाः श्रियः साअध्यधितअदिधारयतिददातीत्यर्थः ॥ अयंभावः॥सर्वकारणभूताचिच्छक्तिः पूर्वकल्पीयानंतजीवानांसदसत्कर्माण्यपरिपक्वान्यवलोक्यतत्फलप्रदानसमयाभावात्सेश्वरंप्रपंचंस्वस्मिन्विलापयतियावत्फलप्रदानसमयम्॥सारात्रिरूपाचिच्छक्तिः फलप्रदानसमयेप्राप्तेमहदादिद्वाराप्रपंचंनिर्मायतत्तत्प्राणिनांतत्तत्कर्माण्यसंकरमवलोकयतिपश्चात्तत्तत्कर्मफलंददातीत्यहोसर्वज्ञताभगवत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्रेर्भुवनेश्वर्याः कियद्वर्णनीयेति ॥ अस्मिन्नर्थेसर्वोप्युपनिषद्भागः प्रमाणमितिस्पष्टमेवतद्विदाम् ॥ १ ॥ इत्थंप्रथमकृत्यंवर्णयित्वाद्वितीयंकृत्यंवर्णयति ॥ ओर्वप्राइति ॥ अमर्त्यामरणरहितासादेवीदेवनशीलाचिच्छक्तिर्भुवनेश्वरीरात्रिः उरुविस्तीर्णमंतरिक्षमुपलक्षणविधयासर्वप्रपंचमाप्राः स्वस्वरूपेणापूरयतिस्वाधिष्ठानरूपेस्वाभेदेनविद्यमानंकल्पयति ॥ तथाप्रपंचगतान्निवतोनीचान्लतागुल्मादीन्उद्वतउच्छ्रितान्वृक्षादींश्चस्वकीयेनतेजसाधिष्ठानचैतन्येनाप्राःपूरयति ॥ यारात्रिर्भुवनेश्वरीसाप्रपंचगतानांप्राणिनांवेदोक्तानुष्ठानपराणांचित्तशुद्धिमवलोक्यतेषांतमोमूलाज्ञानंज्योतिषास्वाकारवृत्तिप्रतिबिंबितस्वस्वरूपचैतन्यज्योतिषाबाधतेनाशयति॥ अनेनपूर्वोक्ताध्यारोपस्यापवादउक्तः॥ २॥ केनप्रकारेणनाशयति तत्राह॥ निरुस्वसारमिति॥ आयतीआगच्छंतीदेवनशीलारात्रिश्चिच्छक्तिर्भुवनेश्वरीस्वस्यस्वसारंभगिनीमुषसंप्रकाशरूपामविद्यायाआवरणशक्तिरूपांनिरस्कृतनिष्करोतिदग्धबीजभावमापादयतीत्यर्थः॥ तस्यामुषसितथाजाता

ओर्वप्राअमर्त्यानिवतोदेव्यु१द्वतः ॥ ज्योतिषाबाधतेतम॥२॥निरुस्वसारमस्कृतोषसंदेव्यायती ॥ अपेदुहासतेतमः ॥ ३ ॥ सानोअद्वयस्यावयंनितेयामन्नविक्ष्महि ॥ वृक्षेनवसतिंवयः ॥ ४ ॥ निग्रामासोअविक्षतनिपद्वंतोनिपक्षिणः ॥ निश्येनासश्चिदर्थिनः ॥ ५ ॥

यांप्रारब्धकर्मक्षयेविक्षेपशक्तेर्नाशान्मूलाज्ञानरूपंतमः अपेदुहासतेअपैवगच्छतिशक्तिद्वयाति रिक्तस्वरूपावस्थानोपयोगाभावादर्थान्नष्टंभवतीत्यर्थः ॥ ३ ॥ अथास्यारात्रेःप्रार्थनामंत्रमाह ॥ सानोइति॥ अद्यास्मिन्कालेनोस्माकंसारात्रिदेवताचिच्छक्तिर्भुवनेश्वरीप्रसीदतुयस्यायामन्यामनिप्राप्तौसत्यांयत्प्रसादप्राप्तौसत्यांवयंन्यविक्ष्महिनिविशामहेसुखेनस्वस्वरूपेआस्महे॥ तत्रदृष्टांतः॥ वयःपक्षिणःवृक्षेनयथावृक्षेनीडाश्रयेवसतिंरात्रिनिवासंकुर्वंतितथानिवसामइत्यर्थः ॥४॥ निग्रामासोइति ॥ ग्रामासः ग्रामाः तस्त्थाः सर्वेजनाः पामराअपामराआंगोपांगनंन्यविक्षततस्यांचिच्छक्तिरूपायांरात्र्यांविद्यमानायांनिविशंतेसुखेनशेरते तथा पद्वंतः पादयुतागवाश्वादयश्चनिविशंतेत थापक्षिणःपक्षोपेताश्चनिविशंतेतथाअर्थिनः कामार्थिनः पांथस्थाः तथाश्येनासः श्येनाअपिनिविशंते ॥अयंभावः ॥ येप्राणिनः परमेश्वरीनामानभिज्ञाअपिकेवलंकरुणासागरायारात्रेश्चिच्छक्तेर्भुवनेश्वर्याः करुणयासर्वेजनाः सुखेनशेरतेस्वस्थाभवंति॥ यथातिमूढाबालाःमातुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करुणावशाच्छेरतेएतादृशीयमतिकरुणावतीरात्रिरस्तीति ॥५॥ याययेति ॥ हेऊर्म्यरात्रिनामैतत् चिच्छक्तिरात्रिरूपिणीभुवनेश्वरीयस्मात्त्वमतिदयावतीत
स्मादस्माकमपिपामराणांकिंचिदपिकृतमनदेक्ष्यवृक्यंवृकस्यस्त्रियंनानावासनारूपांवृकंचवृकवन्मारकंपापंचास्मान्हिंसंतंयावयअस्मत्तः पृथक्कुरु ॥ तथास्ते
नंतस्करंचित्तापहारकंकामादिकंचयावयास्मत्तोवियोजय ॥ अथानंतरंनोस्माकंसुतरासुखेनतरणीयाक्षेमकरीमोक्षदात्रीभव ॥६॥ हेरात्रिचिच्छक्तेभुवनेश्वरि
पेपिशत्भृशंपिंशत्सर्ववस्तुषुआश्लिष्टंतमोज्ञानंकृष्णंकृष्णवर्णंतमः प्राधान्येनव्यक्तंविशेषेणस्वभासासर्वस्यांजकमीदृशंज्ञानंमाउपास्थितउपागच्छत् ॥ हेउषः
रात्रिदेवतेत्वंमृणेवऋणानीवतत्त्वंयातयापगमय यथास्तोतॄणामृणानिधनप्रदानेनापाकरोषितथाममाज्ञानमपि अपसारयेत्यर्थः ॥ ७ ॥ उपतेगाइति ॥ हेरा
त्रिचिच्छक्तेभुवनेश्वरितेत्वांगाइवपयसोदोग्ध्रीर्धेनूरिवउपेत्याकरंस्तुतिजपादिभिरभिमुखीकरोमि ॥ हेदिवः परमाकाशरूपपरमात्मनोदुहितःपुत्रि परमात्मप्र

यावयावृक्यं१वृकंयवयस्तेनमूर्म्ये ॥ अथानःसुतराभवः ॥ ६ ॥ उपमापेपिशत्तमःकृष्णंव्यक्तमस्थित ॥ उषऋणेवयातय ॥ ७ ॥
उपतेगाइवाकरंवृणीष्वदुहितर्दिवः॥रात्रिस्तोमंनजिग्युषे ॥ ८॥ इति रात्रिसूक्तम् ॥

काशेनचिच्छक्तेरभिव्यज्यमानत्वाद्युक्तंपरमात्मपुत्रीत्वंत्वत्प्रसादात्कामादीन्शत्रून्जिग्युषेममस्तोत्रंनस्तोत्रमिवहविरपियथाशक्तिदत्तंवृणीष्वभजेति ॥ ८ ॥
इतिरात्रिसूक्तभाष्यंसमाप्तिमगमत् ॥ ग्रीवायांमधुसूदनोस्यशिरसिश्रीनीलकंठःस्थितः श्रीदेवीगिरिजाललाटफलकेवक्षःस्थलेशारदा ॥ षड्क्रोमणिबंधसं
धिषुतथानागास्तुपार्श्वस्थिताः कर्णौयस्यतुचाश्विनौसभगवान्सिंहोममास्त्विष्टदः ॥ १ ॥ यन्नेत्रेशशिभास्करौवसुकुलंदंतेषुयस्यस्थितंजिह्वायांवरुणस्तुहुंकृ
तिरियंश्रीचर्चिकाचंडिका ॥ गंडौयक्षयमौतथोष्ठयुगुलंसंध्याद्वयंपृष्ठकेवज्रीयस्यविराजतेसभगवान्सिंहोममास्त्विष्टदः ॥ २ ॥ ग्रीवासंधिषुसप्तविंशतिमतान्यृ
क्षाणिसाध्याहृदिप्रौढानिर्घृणतातमोस्यतुमहाक्रौर्यैःसमाःपूतनाः ॥ प्राणेयस्यतुमातरःपितृकुलंयस्यास्त्यपानात्मकंरूपेश्रीकमलाकचेषुविमलास्तेस्यूरवे
रश्मयः ॥ ३ ॥ इतिदेवीपुराणेदेवीवाहनसिंहध्यानम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.03.20 14:13
,TRANSFERRED=2020/03/20 at 14:21:33
,PAGES=51
,TYPE=STD
,NAME=S0003001
,Book Name=M-2941-DEVIPURAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection